ऊर्ग् अस्य् ऊर्जोदा:। पं०वि०ब्रा० ६.४.११; ला०श्रौ०सू० १.७.५

ऊर्ग् भव बर्हिषद्भ्य:। तै०सं० १.१.११.१; तै०ब्रा० ३.३.६.४

ऊर्ग् राजानम् उद् अवहत्। तै० ब्रा० ३.१२.९.५[१]

ऊर्ज एहि। अ०वे० ८.१०.११, २६

ऊर्ज: पुत्रं भरतं सृप्रदानुम्। ऋ०वे० १.९६.३[३]

ऊर्ज: पृथिव्या अध्युत्थितोऽसि। तै० ब्रा० १.२.१.५[१]; आप०श्रौ०सू० ५.२.४[१]

ऊर्जं ये ह्यु उत्तर आ वहन्तु। अ०वे० १९.७.४[२]

ऊर्जं वसान: श्रवसे सुमङ्गल:। ऋ०वे० ९.८०.३[२]

ऊर्जं वहन्तीर् अमृतं घृतं पय: कीलालं परिस्रुतम्। वा०सं० २.३४; शा०श्रौ०सू० ४.५.३; आप०श्रौ०सू० १.१०.४; सा०मं०ब्रा० २.३.१५; बौ०ध०सू० २.५.१०.४. प्रतीक:- ऊर्जं वहन्ती:। गो०गृ०सू० ४.३.२६; ख०गृ०सू० ३.५.३१; ख०गृ०सू० ७३.२३; बृ०प०सं० ५.२७८; ऊर्जम्। का०श्रौ०सू० ४.१.१९

ऊर्जं संसूदेन। (का०सं० अश्व० °सीदेन) तै०सं० ५.७.११.१; का०सं० अश्व० १३.१

ऊर्जं संधत्तं तां मे जिन्वतम्। तै० ब्रा० १.१.१.१.; आप०श्रौ०सू० १२.२२.६

ऊर्जं सपीतिम् उत्कृषे। मै०सं० २.७.१२[४], ९२.१४

ऊर्जं सप्तपदीम् अरि:। ऋ०वे० ८.७२.१६[२]

ऊर्जं सुभूतं स्वस्ति सविता न: कृणोतु। अ०वे० ६.४०.२[२]

ऊर्जं गावो यवसे पीवो अत्तन। ऋ०वे० १०.१००.१०[१]

ऊर्जं गृहेषु धारय। अ०वे० ६.७९.२[२]

ऊर्जं गृह्णीत। मै०सं० ४.१.५, ६.१६

ऊर्जं च तत्र सुमतिं च पिन्वत। अ०वे० ६.२२.२[३]; तै०सं० ३.१.११.८[३]

ऊर्जं चौजश् च बिभ्रती:। आ०गृ०सू० २.१०.६[२]

ऊर्जं जनाय गिर्वण:। ऋ०वे० ९.६४.१४[२]; सा०वे० २.१९२[२]

ऊर्जं दधाथाम्। वा०सं० ६.३५; तै०सं० १.४.१.२; मै०सं० १.३.३, ३१.५; का०सं० ३.१०; श०ब्रा० ३.९.४.१८

ऊर्जं दुहाते अनपस्फुरन्तौ। अ०वे० ९.१.७[३]

ऊर्जं दुहानम् अनपस्फुरन्तम्। अ०वे० १८.४.३६[३]

ऊर्जं दुहाना अनपस्फुरन्त:। तै०आ० १.७.१[४], ४[४]

ऊर्जं दुहाना पयसा न आगन्। अ०वे० ७.७९.३[४]

ऊर्जं दुहाना पयसा प्रपीना। आप०श्रौ०सू० ४.१०.७[२]

ऊर्जं दुहाना: शुचय: शुचिव्रता:। कौ० सू० ८९.१२[३]

ऊर्जं धत्स्व। वा०सं० ६.३५; मै०सं० १.३.३, ३१.४; श०ब्रा० ३.९.४.१८

ऊर्जं नो द्यौश् च पृथिवी च पिन्वताम्। ऋ०वे० ६.७०.६[१]

ऊर्जं नो धत्तम् अश्विना। ऋ०वे० ८.३५.१०[४]–१२[४]

ऊर्जं नो धेहि (मै०सं० १.६.२[४], ८९.७; का०सं० ७.१४[४], धत्त) द्विपदे चतुष्पदे। वा०सं० ११.८३[४], १७.६६[४]; तै०सं० ४.२.३.१[४], ६.५.१[४], ५.२.२.१; मै०सं० १.६.२[४] (तृतीयांश), ८६.१९, ८८.२, ८९.७, २.१०.१[४], १३२.६, ३.३.९, ४१.१९; का०सं० ७.१३[४], १४[४], १६.१०[४], १८.४[४], १९.१२; श०ब्रा० ६.६.४.७, ९.२.३.२५; तै०ब्रा० १.१.७.१[३], ८.५, २.१.२३[४], ३.११.४.१; आ०गृ०सू० १.१६.५[४]; शा०गृ०सू० १.२७.७[४]; आ०मं०पा० २.१५.१५[४]; प्राणा० उप० १[४]

ऊर्जं नो धेहि भद्रया। तै०सं० ३.३.८.३[२]

ऊर्जम् अक्षितम् अक्षीयमाणम् उपजीव्यासम्। कौ० सू० ६८.१, २

ऊर्जम् अपचितिं स्वधाम्। वा०सं० २१.५८[५]; मै०सं० ३.११.५[५], १४८.७; तै०ब्रा० २.६.१४.६[५]

ऊर्जम् अस्मा ऊर्जस्वती धत्तम्। अ०वे० २.२९.५[१]

ऊर्जम् अस्मासु धत्तम्। मै०सं० १.३.३, ३१.५

ऊर्जम् अस्मासु धेहि। मै०सं० १.३.३, ३१.४; का०सं० ३.१०, ६.८; आप०श्रौ०सू० ६.१४.२

ऊर्जम् अस्मै द्यावापृथिवी अधाताम्। अ०वे० २.२९.५[३]

ऊर्जम् आ वद। तै०सं० १.१.५.२; मै०सं० १.१.६, ३.१५, ४.१.६, ८.१४; तै०ब्रा० ३.२.५.८; आप०श्रौ०सू० १.२०.२; मा०श्रौ०सू० १.२.२.१७ देखें- इषम् ऊर्जम् आ वद।

ऊर्जम् ओमानम् अश्विनाव् अधत्तम्। ऋ०वे० १.११८.७[२]

ऊर्जं पय: पिन्वमाना घृतं च। तै० ब्रा० ३.७.४.१५[३]; आप०श्रौ०सू० १.१२.१४[३]; मा०श्रौ०सू० १.१.३.१८[१]

ऊर्जं पितृभ्य आहार्षम्। कौ० सू० ८९.१२[३]

ऊर्जं पिन्व। मा०गृ०सू० १.१७.७ तुल०- ऊर्जे पिन्वस्व।

ऊर्जं पुष्टं वस्व् आवेशयन्ती। अ०वे० ७.७९.३[२] देखें-विश्वा रूपाणि वसून्य्।

ऊर्जं पुष्टं बिभ्रतीम् अन्नभागम्। अ०वे० १२.१.२९[३]

ऊर्जं पुष्टिं ददद् अभ्याववृत्स्व। तै० ब्रा० ३.१०.५.१[४]

ऊर्जं पृथिव्या भक्त्वाय। (अ०वे० भक्त्वा)। ऋ०वे० १०.१०९.७[३]; अ०वे० ५.१७.११[३]

ऊर्जं पृथिव्या रसम् आभरन्त:। तै० ब्रा० १.२.१.२[१]; आप०श्रौ०सू० ५.१.७[१]

ऊर्जं प्रजाम् अमृतं दीर्घम् आयु: (आ०गृ०सू० अमृतं पिन्वमान:)। आ०गृ०सू० २.४.१४[३]; पा०गृ०सू० ३.३.६[३]; मा०श्रौ०सू० २.८.६[३]

ऊर्जं बिभ्रत एमसि। वा०सं० ३.४१[२]; ला०श्रौ०सू० ३.३.१[२]; आप०श्रौ०सू० ६.२७.३[२]; शा०गृ०सू० ३.७.२[२]; हि०गृ०सू० १.२९.१[२]

ऊर्जं बिभ्रद् वसुवनि: (वा०सं० ला०श्रौ०सू० शा०गृ०सू० आप०श्रौ०सू० ६.२७.५, व: सुमना:; आप०श्रौ०सू० ६.२७.३, व: सुवनि:; आप०श्रौ०सू० १६.१६.४, वसुमना:) सुमेधा:। अ०वे० ७.६०.१[१]; वा०सं० ३.४१[३]; का०सं० ३८.१३[१]; ला०श्रौ०सू० ३.३.१[३]; आप०श्रौ०सू० ६.२७.३[३], ५[१], १६.१६.४[१]; शा०गृ०सू० ३.७.२[३]; हि०गृ०सू० १.२९.१[३]. प्रतीक: ऊर्जं बिभ्रत्। कौ० सू० २४.११, ४२.८, ७२.५, ८२.१५, ८९.११

ऊर्जं मदन्तीम् अदितिं जनेषु। अ०वे० १८.४.३०[३]

ऊर्जं मनुष्या उत। कौ० सू० ८९.१२[२]

ऊर्जं मयि धेहि। वा०सं० ४.१०, १०.२४; वा०सं०काण्व० २.३.८; मै०सं० १.२.२, ११.५, २.६.१२, ७१.३, ४.४.६, ५६.४; का०सं० २.३, ५.५, ८.१३; पं०वि०ब्रा० १.६.१५; श०ब्रा० ३.२.१.१४, ५.४.३.२६; ला०श्रौ०सू० ४.११.२१; आप०श्रौ०सू० १४.३३.२; मा०श्रौ०सू० १.४.२.१२, ९.४.१ देखें-ऊर्जं मे देहि तथा निम्न।

ऊर्जं मह्यं शस्त्रं दुहाम्। तै०सं० ३.२.७.२, ३

ऊर्जं मह्यं स्तुतं दुहाम्। तै०सं० ३.२.७.१, ३; वै० सू० १७.८

ऊर्जं मे देवा अददु:। कौ० सू० ८९.१२[१]

ऊर्जं मे देहि। पं०वि०ब्रा० ६.४.११ (द्वितीयांश); ला०श्रौ०सू० १.७.५ (द्वितीयांश) देखें-ऊर्जं मयि।

ऊर्जं मे धत्तम्। तै०सं० १.४.१.२

ऊर्जं मे धेहि। वा०सं०काण्व० ११.७.५; तै०सं० १.८.१५.२; का०सं० १५.८; गो०ब्रा० २.१.७; तै०ब्रा० १.७.९.५; वै० सू० ३.२०; का०श्रौ०सू० ३.४.३० देखें-ऊर्जं मयि।

ऊर्जं मे यछ। वा०सं०काण्व० ४.४.२; तै०सं० १.२.२.२ देखें-ऊर्जं मयि।

ऊर्जयन्तीम् उदोजसम्। ऋ०वे० १०.९७.७[२]; वा०सं० १२.८१[२]; तै०सं० ४.२.६.४[२]; मै०सं० २.७.१३[२], ९३.१५; का०सं० १६.१३[२]

ऊर्जयन्त्या अपरिविष्टम् आस्यम्। ऋ०वे० २.१३.८[३]

ऊर्जया पयसा सह। अ०वे० १०.६.२६[४]

ऊर्जया वा यत् सचते हविर्दा:। अ०वे० ५.१.७[४]

ऊर्ज स्कम्भं धरुण आ वृषायसे। ऋ०वे० १०.४४.४[२]; अ०वे० २०.९४.४[२]

ऊर्ज (मै०सं० ऊर्ज:; का०सं० ऊर्जस्) स्थोर्जं वो भक्षीय। वा०सं० ३.२०; तै०सं० १.५.६.१, ८.१; मै०सं० १.५.२, ६८.९, १.५.९, ७७.१६; का०सं० ७.१; श०ब्रा० २.३.४.२५; शा०श्रौ०सू० २.११.६. प्रतीक: ऊर्जस् स्थ। का०सं० ७.७

ऊर्जस्वती: पयस्वती:। तै०सं० १.१.१.१; मै०सं० २.८.१४[३], ११८.१८, ३.३.४, ३६.६; तै०ब्रा० ३.२.१.५ देखें- ऊर्जस्वती: स्वधा°।

ऊर्जस्वती घृतवती पयस्वती। अ०वे० ३.१२.२[३] नीचे देखें- ऊर्जस्वती पयसा।

ऊर्जस्वती घृतवत् पिन्वमाना। अ०वे० ३.१७.९[४]

ऊर्जस्वती च पयस्वती च। मै०सं० ४.१३.९, २१२.३; तै०ब्रा० ३.५.१०.२; श०ब्रा० १.९.१.७; शा०श्रौ०सू० ८.१९.१ देखें-ऊर्जस्वती पयस्वती।

ऊर्जस्वती च मे पयस्वती चैधि। तै० ब्रा० ३.७.६.६; आप०श्रौ०सू० ४.६.२

ऊर्जस्वती चासि पयस्वती च। वा०सं० १.२७; श०ब्रा० १.२.५.११. प्रतीक: ऊर्जस्वती। का०श्रौ०सू० २.६.३१

ऊर्जस्वती पयसा पिन्वमाना। वा०सं० १२.७०[३]; तै०सं० ४.२.५.६[३]; श०ब्रा० ७.२.२.१०; तै०आ० १०.४२.१[३]; हि०गृ०सू० १.८.४[३], २७.३[३]; महाना०उप०१६.७ देखें-ऊर्जस्वती घृतवती तथा ऊर्जो भागं मधुमत्।

ऊर्जस्वती पयस्वती। अ०वे० ९.३.१६[१]; आ०श्रौ०सू० १.९.१; शा०श्रौ०सू० १.१४.५ देखें-ऊर्जस्वती च प°।

ऊर्जस्वती राजस्वश् (तै०सं० राजसूयाय; मै०सं० का०सं० राजसूयाश्) चिताना:। वा०सं० १०.१[२]; तै०सं० १.८.११.१[२]; मै०सं० २.६.८[२], ६८.९; का०सं० १५.६[२]; श०ब्रा० ५.३.४.३

ऊर्जस्वतीर् ओषधीर् आ रिशन्ताम्। ऋ०वे० १०.१६९.१[२]; तै०सं० ७.४.१७.१[२] देखें-ऊर्जस्वतीर्।

ऊर्जस्वती: स्वधाविनी:। (का०सं० स्वधायिनी:) तै०सं० ४.४.११.४[३]; का०सं० १७.१० देखें-ऊर्जस्वती: पयस्वती:।

ऊर्जस्वन्त: पयस्वन्त:। अ०वे० ७.६०.२[२]; हि०गृ०सू० १.२९.१[१]

ऊर्जस्वन्तं हविषो दत्त भागम्। ऋ०वे० १०.५१.८[२]; नि० ८.२२[२]

ऊर्जस्वन्तं त्वा पयसोपसंसदेम। तै०आ० ६.१२.१[२]

ऊर्जस्वन्तीर् ओषधीर् आ विशन्ताम्। का०सं० अश्व० ४.६[२] देखें-ऊर्जस्वतीर् इत्यादि।

ऊर्जस्वन्तो गृहा मम। कौ० सू० ८९.१२[४]

ऊर्जस्वन्तो हविष: सन्तु भागा:। ऋ०वे० १०.५१.९[२]; नि० ८.२२[२]

ऊर्जस्वांश् च पयस्वाङ्श् च। अ०वे० १९.४६.६[४]

ऊर्ज: स्थोर्जं इत्यादि। देखें-ऊर्ज स्थोर्जं इत्यादि।

ऊर्जा स्वधाम् अजरां सा त एषा। अ०वे० २.२९.७[२]

ऊर्जा गृह्णाम्य अक्षितम्। वा०सं० ३८.२६[४] देखें-सहोर्जा।

ऊर्जा घृतेन पयसा। ऋ०वे० १०.१९.७[२]

ऊर्जाद उत यज्ञियास:। ऋ०वे० १०.५३.४[३]; आप०श्रौ०सू० २४.१३.३[३]; नि० ३.८[३]

ऊर्जा देवाङ् अवस्य् ओजसा त्वाम्। ऋ०वे० ८.३६.३[१]

ऊर्जा नाम स्थ। शा०गृ०सू० २.६.१

ऊर्जा पिन्वस्व सम् इषो दिदीहि न:। ऋ०वे० ३.३.७[२]

ऊर्जा पृथिवीं गच्छत (मै०सं० यछत) तै०सं० १.१.११.१; मै०सं० ४.१.१३, १७.१०; का०सं० १.११, ३१.१०; तै०ब्रा० ३.३.६.५

ऊर्जा मा पश्यत। तै०सं० १.५.६.३, ८.४; मै०सं० १.५.३, ६९.१५, १.३.१०, ७८.१४; का०सं० ७.१, ८; आप०श्रौ०सू० ६.१७.९; हि०गृ०सू० १.१८.४

ऊर्जा माविश गौपत्येन। वा०सं० ३.२२; श०ब्रा० २.३.४.२७; शा०श्रौ०सू० २.१२.१ देखें-आ मोर्जा।

ऊर्जा मित्रो वरुण: पिन्वतेडा:। सा०वे० १.४५५[१] देखें-इषं नो मित्रा°।

ऊर्जा मे भगव: सह जनिष्ठा:। (मा०श्रौ०सू० भगवन्त: सहाजनिढम्)। मै०सं० ४.२.८, ३०.४; मा०श्रौ०सू० ९.५.३

ऊर्जाय जात्यै मम शत्रुहत्यै। तै०आ० ६.५.१[४]

ऊर्जाय त्वा। मै०सं० १.३.१६, ३६.१०; का०सं० ४.७ तुल०- ऊर्जे त्वा।

ऊर्जा यद् यज्ञम् अयजन्त (तै०सं० मै०सं० का०सं० अशमन्त) देवा:। वा०सं० १७.५५[४]; तै०सं० ४.६.३.२[१]; मै०सं० २.१०.५[४], १३६.१६; का०सं०

१८.३[४]; श०ब्रा० ९.२.३.९

ऊर्जाय व:। आप०श्रौ०सू० १.१७.१०

ऊर्जाय स्वाहा। वा०सं० २२.३१; मै०सं० ३.१२.१३, १६४.६

ऊर्जा व: पश्यामि। तै०सं० १.५.६.३, ८.४; मै०सं० १.५.३, ६९.१५, १.५.१०, ७८.१४; का०सं० ७.१, ८; आप०श्रौ०सू० ६.१७.९; मा०श्रौ०सू० १.६.२.१०, ९.४.१; हि०गृ०सू० १.१८.४

ऊर्जा संरब्धा इरया मदेम। मा०श्रौ०सू० २.५.४.२४[४]

ऊर्जाहुतिर् वसूनाम्। ऋ०वे० ८.३९.४[३]

ऊर्जि सीद। का०सं० ३९.६; आप०श्रौ०सू० १६.३०.१ तुल०– इष ऊर्जे सीद।

ऊर्जीव फलिनी भव। शा०गृ०सू० १.२२.१०[२]; सा०मं०ब्रा० १.५.१[२]; पा०गृ०सू० १.१५.६[२]

ऊर्जे त्वा। वा०सं० १.१, ३०, ७.३०, १४.२२, १८.२८; तै०सं० १.१.१.१, ४.३.७.२; मै०सं० १.२.१, १०.३, १.२.१६, २६.१५, १.११.३, १६४.३, २.८.३, १०९.२, २.११.६, १४४.३, ३.१०.१, १२९.७; का०सं० १.१, १०.१७.३, १८.१२; गो०ब्रा० १.१.२९; श०ब्रा० १.२.२.६, ७.१.२, ४.३.१.१७, ८.३.४.१०, ९.३.३.१०, ११; तै०ब्रा० ३.२.१.३; का०श्रौ०सू० २.७.४, ४.२.१; आप०श्रौ०सू० १.१.१०, ११, २.६.१, ६.१०.१०, ७.१९.१, १०.६.७; मा०श्रौ०सू० १.१.१.१४, ६.१.४२, ८.४.१२, २.१.१.३२; शा०गृ०सू० १.८.२०; कौ० ७६.२४ तुल०– ऊर्जाय त्वा।

ऊर्जे त्वा। (जाँचें– सुमङ्गलि प्रजावति सुसीमे) कौ० सू० ७६.२४ देखें–ऊर्जे द्विपदी तथा द्वे ऊर्जे।

ऊर्जे त्वा बलाय त्वा। अ०वे० १९.३७.३[१]

ऊर्जे द्विपदी। आ०गृ०सू० १.७.१९; शा०गृ०सू० १.१४.६ नीचे देखें– ऊर्जे त्वा (जाँचें– 'सुमङ्गलि' इत्यादि।

ऊर्जेऽपानाय। आप०श्रौ०सू० २४.१४.१३

ऊर्जे पिन्वस्व। वा०सं० ३८.१४; श०ब्रा० १४.२.२.२७ तुल०– अगला तथा ऊर्जं पिन्व।

ऊर्जे पिपीहि (तै०आ० आप०श्रौ०सू० पीपिहि)। मै०सं० ४.९.९, १२९.७; तै०आ० ४.१०.१, ५.८.६; आप०श्रौ०सू० १५.१०.१३ तुल०– पूर्व का तथा नीचे– इष ऊर्जे पिपीहि।

ऊर्जेमं रय्या वर्चसा सं सृजाथ। तै० ब्रा० २.७.१७.२[४]; हि०गृ०सू० २.६.१०[४]

ऊर्जे होत्राणां स्वाहा। तै०सं० ३.२.८.१

ऊर्जो नपाज्जातवेद: सुशस्तिभि:। ऋ०वे० १०.१४०.३[१]; सा०वे० २.११६८[१]; वा०सं० १२.१०८[१]; तै०सं० ४.२.७.२[१]; मै०सं० २.७.१४[१], ९५.१८; का०सं० १६.१४[१]; श०ब्रा० ७.३.१.३१

ऊर्जो नपातं स हिनायम् अस्मयु:। ऋ०वे० ६.४८.२[१]; सा०वे० २.५४[१]; वा०सं० २७.४४[१]; मै०सं० २.१३.९[१], १५९.१२; का०सं० ३९.१२[१]; आप०श्रौ०सू० १७.९.१[१]. प्रतीक: ऊर्जो नपातम्। ष०ब्रा० १.३.२१ (भाष्य।

ऊर्जो नपातं सुभगं सुदीदितिम्। ऋ०वे० ८.१९.४[१] देखें–अपां नपातं इत्यादि।

ऊर्जो नपातं घृतकेशम् ईमहे। ऋ०वे० ८.६०.२[३]; अ०वे० २०.१०३.३[३]; सा०वे० २.९०३[३]

ऊर्जो नपातम् अध्वरे। ऋ०वे० ३.२७.१२[१]

ऊर्जो नपातम् आ हुवे। ऋ०वे० ७.१६.१[२], ८.४४.१३[१]; सा०वे० १.४५[२], २.९९[२], १०६२[१]; वा०सं० १५.३२[२]; तै०सं० ४.४.४.४[२]; मै०सं० २.१३.८[२], १५७.३; का०सं० ३९.१५[२]

ऊर्जो नपात् पूर्भिर् आयसीभि:। ऋ०वे० १.५८.८[४]

ऊर्जो नपात् सहसावन्न् इति त्वा। ऋ०वे० १०.११५.८[१]

ऊर्जो नपाद् अभिष्टये। ऋ०वे० ५.१७.५[३]

ऊर्जो नपाद् अमृतस्य। ऋ०वे० ६.१६.२५[३]

ऊर्जो नपाद् अमृतेभि: सजोषा:। ऋ०वे० १०.२०.१०[२]

ऊर्जो नपाद् अश्वमिष्टे। ऋ०वे० २.६.२[२]

ऊर्जो नपाद् उपस्तुतिम्। ऋ०वे० ८.८४.४[२]; सा०वे० २.८९९[२]

ऊर्जो नपाद् भद्रशोचे। ऋ०वे० ८.७१.३[२]

ऊर्जो नपान् माहिनस्य। ऋ०वे० ८.७१.९[२]

ऊर्जो नप्त्रे सहस्वते। ऋ०वे० ५.७.१[४]; वा०सं० १५.२९[४]; तै०सं० २.६.११.४[४], ४.४.४.४[४]; मै०सं० ४.११.१[४], १६०.९; का०सं० २.१५[४]

ऊर्जो नप्त्रे स्वाहा। तै०सं० १.८.१६.२; मै०सं० २.६.१३, ७२.८, ४.४.७, ५८.२; का०सं० १५.८; तै०ब्रा० १.७.१०.६; आप०श्रौ०सू० १८.२०.४; मा०श्रौ०सू० ९.१.५

ऊर्जो बलं सह ओजो न आगन्। अ०वे० १८.४.५३[२]

ऊर्जो भागं शतक्रतू। तै० ब्रा० ३.७.५.१२[२]; शा०श्रौ०सू० ४.१०.१[२]; आप०श्रौ०सू० २.२०.६[२]

ऊर्जो भागं पृथिव्या यात्य् (का०सं० पृथिवीम् एत्य्; आप०श्रौ०सू० पृथिवीम् एत्व्) आ पृणन्। मै०सं० २.७.१२[४], ९२.१२; का०सं० ३८.१४[४]; आप०श्रौ०सू० १६.१८.६[४]

ऊर्जो भागं मधुमत् पिन्वमाना। (आप०श्रौ०सू० का०सं० ४०.५[२], शूनृतावत्)। मै०सं० २.७.१२[३], ९२.८; का०सं० १६.१२[३], ४०.५[२]; आप०श्रौ०सू० १६.३४.४[२] नीचे देखें– ऊर्जस्वती पयसा।

ऊर्जो भागो निहितो यः पुरा वः। अ०वे० ११.१.१५[१]. प्रतीकः ऊर्जो भागः। कौ० सू० ६०.२९

ऊर्जो भागो य इमं जजान। अ०वे० १८.४.५४[१]. प्रतीकः ऊर्जो भागः। कौ० सू० ८६.७

ऊर्जो मा पाह्य् ओदृचम्। मा०श्रौ०सू० २.१.२.१६ देखें–'ऊर्ध्वो मा' इत्यादि।

ऊर्जोर्जयध्वम्। का०ब्रा० २८.५; आ०श्रौ०सू० ५.७.३; शा०श्रौ०सू० ७.६.३

ऊर्णम्रदसं (तै०सं० तै०ब्रा० आप०श्रौ०सू० ऊर्णा°) त्वा स्तृणामि (का०सं० ऊर्णम्रदः प्रथस्व; कौ० सू० ऊर्णम्रदं प्रथस्व) स्वासस्थं देवेभ्यः। वा०सं० २.२, ५; तै०सं० १.१.११.१; का०सं० १.११; श०ब्रा० १.३.३.११, ४.११; तै०ब्रा० ३.३.६.७; कौ० सू० २.१७. प्रतीकः ऊर्णाम्रदसं त्वा स्तृणामि। आप०श्रौ०सू० २.९.२; ऊर्णम्रदसम्। का०श्रौ०सू० २.७.२२, ८.१० देखें–उरु प्रथस्वोर्णम्रदं तथा तुलना अस्मिन् यज्ञे वि।

ऊर्णम्रदा युवतिर्। (अ०वे० °म्रदाः पृथिवी) दक्षिणावते। (तै०आ० दक्षिणावती)। ऋ०वे० १०.१८.१०[३]; अ०वे० १८.३.४९[३]; तै०आ० ६.७.१[३]

ऊर्णम्रदा वि प्रथस्व। ऋ०वे० ५.५.४[१]

ऊर्णम्रदाः सरस्वत्याः। वा०सं० २१.५७[३]; मै०सं० ३.११.५[३], १४८.२; तै०ब्रा० २.६.१४.५[३]

ऊर्णामृदु प्रथमानं स्योनम्। तै०ब्रा० ३.७.६.५[१]; आप०श्रौ०सू० ४.५.५[१]

ऊर्णाम्रदसं इत्यादि। देखें–ऊर्णम्रदसं इत्यादि।

ऊर्णावती युवतिः सीलमावती। ऋ०वे० १०.७५.८[३]

ऊर्णावन्तं प्रथमः सीद योनिम्। ऋ०वे० ६.१५.१६[२]; तै०सं० ३.५.११.२[२]; मै०सं० ४.१०.४[२], १५२.४; का०सं० १५.१२[२]; आ०ब्रा०१.२८.२६; आप०श्रौ०सू० ७.६.७, ८.१.७, १७.१५.४. प्रतीकः ऊर्णावन्तम्। मा०श्रौ०सू० १.७.३.४२, ५.२.८.५

ऊर्णा वसत शुन्ध्यवः। ऋ०वे० ५.५२.९[२]

ऊर्णावा इव धीर्यः। का०ब्रा० १९.३[२]

ऊर्णासूत्रेण कवयो वयन्ति। वा०सं० १९.८०[२]; मै०सं० ३.११.९[२], १५३.१; का०सं० ३८.३[२]; तै०ब्रा० २.६.४.१[२]

ऊर्ध्व ऊ षु ण ऊतये। ऋ०वे० १.३६.१३[१]; सा०वे० १.५७[१]; वा०सं० ११.४२[१]; तै०सं० ४.१.४.२[१], ५.१.५.३; मै०सं० २.७.४[१], ७८.१३, ४.१३.१, १९९.८; का०सं० १५.१२[१], १६.४[१], १९.५; आ०ब्रा०१.२२.८, २.२.१४; का०ब्रा० १०.२; श०ब्रा० ६.४.३.१०; तै०ब्रा० ३.६.१.२[१]; तै०आ० ४.२०.१; आ०श्रौ०सू० ४.७.४; आप०श्रौ०सू० ९.१८.१०, १५.१७.७, १६.३.८; महाना०उप०२०.६[१]. प्रतीकः ऊर्ध्व ऊ षु णः। वा०सं० ३३.९७; मै०सं० ४.९.१२, १३४.२; शा०श्रौ०सू० ५.१५.३; का०श्रौ०सू० १६.३.८; मा०श्रौ०सू० ३.५.४, ६.१.१; ऊर्ध्वः। ला०श्रौ०सू० २.५.६ तुल०– बृ. दा. ४.१००।

ऊर्ध्व ऊ षु णो अध्वरस्य होतः। ऋ०वे० ४.६.१[१]; शा०श्रौ०सू० १४.५६.२, ३. प्रतीकः ऊर्ध्व ऊ षु णः। आ०श्रौ०सू० ४.१३.७

ऊर्ध्वः प्राण उद् ईषतु। अ०वे० ११.९.२१[२]

ऊर्ध्वं यज्ञं नयतं मा जिह्वरतम्। वा०सं० ५.१७; तै०सं० १.२.१३.२; श०ब्रा० ३.५.३.१७

ऊर्ध्वं स्तूपं ददते पूतदक्षः। ऋ०वे० १.२४.७[२]

ऊर्ध्वं स्विष्टकृता सह। कौ० सू० ६.३४[२]

ऊर्ध्वग्रावाणो अध्वरम् अतष्ट। ऋ०वे० ३.५४.१२[४]

ऊर्ध्वं कृण्वन्त्व् अध्वरस्य केतुम्। ऋ०वे० ३.८.८[४]

ऊर्ध्वं केतुं सविता देवो अश्रेत्। ऋ०वे० ४.१४.२[१] तुल०– ऊर्ध्वं भानुं इत्यादि।

ऊर्ध्वचितः श्रयध्वम्। वा०सं० १२.४६; तै०सं० ४.२.७.४; श०ब्रा० ७.१.१.१४; तै०आ० ६.६.२ देखें–ऊर्ध्वश्रितः।

ऊर्ध्वज्योतिषं त्वा सादयामि। मै०सं० २.१३.१९, १६५.७

ऊर्ध्वं जिगातु भेषजम्। ऋ०वे०खि० १०.१९१.५[५]; मै०सं० ४.१३.१०[५], २१३.१; श०ब्रा० १.९.१.२७; तै०ब्रा० ३.५.११.१[५]; तै०आ० १.९.७[५], ३.१[५] (भूमिका) तुल०– इण्डो०स्टडि० ग्८४३१.

ऊर्ध्वधन्वा प्रतिहिताभिर् अस्ता। तै०सं० ४.६.४.१[४]; मै०सं० २.१०.४[४], १३५.१४; का०सं० १८.५[४] देखें–उग्रधन्वा।

ऊर्ध्वनभसं (कौ० सू० त्रुटिपूर्ण ऊर्ध्वं नभसं) मारुतं (मै०सं० मारुतं देवं) गच्छतम्। तै०सं० १.३.९.२; मै०सं० १.२.१६,२७.१; का०सं० ३.६; कौ० सू० ४५.१२ देखें–स्वाहाकृते ऊर्ध्व° तथा स्वाहोर्ध्वनभसं।

ऊर्ध्वं दधानः शुचिपेशसं धियम्। ऋ०वे० १.१४४.१[२]

ऊर्ध्वं नुनुद्र उत्सधिं पिबध्यै। ऋ०वे० १.८८.४[४]

ऊर्ध्वं नुनुद्रेऽवतं त ओजसा। ऋ०वे० १.८५.१०[१]

ऊर्ध्वं नो अध्वरं कृतं हवेषु। ऋ०वे० ७.२.७[३]

ऊर्ध्वपवित्रो वाजिनीवस्व् अमृतम्। तै०आ० ७.१०.१[३]; तै०उप० १.१०.१[३]

ऊर्ध्वं इमम् अध्वरं कृध्य् उत्तमेन पविना। का०सं० ३.१०

ऊर्ध्वं इमम् अध्वरं (वा०सं०काण्व० ऊर्ध्वो अध्वरं) दिवि (तै०सं० । तै०आ० अध्वरं कृधि दिवि) देवेषु होत्रा यछ। वा०सं० ६.२५; वा०सं०काण्व० ६.७.१; तै०सं० १.३.१३.१; मै०सं० १.३.१, २९.५, ४.९.६, १२६.७; का०सं० ३.९; श०ब्रा० ३.९.३.५; तै०आ० ४.७.३ तुल०– ऊर्ध्वो अध्वरं

दिवि देवेषु धेहि।

ऊर्ध्वमूलम् अवाक्छाखम्। तै०आ० १.११.५[१]

ऊर्ध्वम् एनं इत्यादि। देखें-ऊर्ध्वं एनाम् इत्यादि।

ऊर्ध्वं पन्थाम् अनुपश्यमानाः। मै०सं० २.१३.२२[२], १६७.१८ देखें-ऋजुं इत्यादि) तथा स्वर्गं पन्थाम्।

ऊर्ध्वं प्रजाम् उद्धरन्त्य् उद् ऊह। अ०वे० ११.१.९[४]. प्रतीकः ऊर्ध्वं प्रजाम्। कौ० सू० ६१.२४

ऊर्ध्वं भरन्तम् उदकम्। अ०वे० १०.८.१४[१]

ऊर्ध्वं भानुं सविता देवो अश्रेत्। ऋ०वे० ४.१३.२[१], ७.७२.४[३]; का०ब्रा० २५.२ तुल०- ऊर्ध्वं केतुं।

ऊर्ध्वं भानुं सविता द्यां इवोपरि। अ०वे० १८.३.२९[२]

ऊर्ध्वं भानुं सवितेवाश्रेत्। ऋ०वे० ४.६.२[३]

ऊर्ध्वं भानुं सूर्यस्य स्तभायन्। ऋ०वे० १०.३.२[३]; सा०वे० २.८९७[३]

ऊर्ध्वं मधुधा दिवि पाजो अश्रेत्। ऋ०वे० ३.६१.५[३]

ऊर्ध्वं मनः स्वर्ग्यम्। (तै०आ० सुवर्गम्)। मै०सं० ४.९.१०, १३०.९; तै०आ० ४.१२.१

ऊर्ध्वं मे नाभेः सीद। वा०सं०काण्व० २.३.६; का०श्रौ०सू० ९.१२.४[३]; आप०श्रौ०सू० ३.२०.१

ऊर्ध्वया त्वा दिशा बृहस्पतिना देवतया पाङ्क्तेन छन्दसाग्नेः पृष्ठम् उपदधामि। का०सं० २२.५ देखें-अगला।

ऊर्ध्वया त्वा दिशा सादयामि। तै०सं० ५.५.८.३; मै०सं० २.८.११, ११५.१७ देखें-पूर्व का।

ऊर्ध्वया दिशा (शा०श्रौ०सू० दिशा सह) यज्ञः संवत्सरो मार्जयताम्। (का०सं० °यन्ताम्; शा०श्रौ०सू० संवत्सरो यज्ञपतिर् मार्जयन्ताम्)। मै०सं० १.४.२, ४८.१३; का०सं० ५.५; शा०श्रौ०सू० ४.११.४ देखें-ऊर्ध्वायां दिशि यज्ञः।

ऊर्ध्वरितं विरूपाक्षम्। तै०आ० १०.१२.१[३]; महाना०उप०१२.१[३]

ऊर्ध्वलिङ्गाय नमः। तै० ऐ आ० १०.१६

ऊर्ध्ववक्त्राय नमः। मा०श्रौ०सू० ११.७.१

ऊर्ध्ववयसे त्वा। मै०सं० २.१३.१७, १६४.१४ देखें-आप०श्रौ०सू० १७.६.१।

ऊर्ध्ववयसे स्वाहा। मै०सं० ३.१२.१४, १६४.९ देखें-आप०श्रौ०सू० १७.६.१।

ऊर्ध्वश्रितः श्रयध्वम्। मै०सं० २.७.११, ९०.४; का०सं० १६.११.३८.१२ देखें-ऊर्ध्वचितः।

ऊर्ध्वसद् असि वानस्पत्यः। आप०श्रौ०सू० १०.१०.४ देखें-'बृहन्न् असि' इत्यादि।

ऊर्ध्वस् तस्थाव् ऋभ्वा यज्ञे। ऋ०वे० १०.२०.५[२]

ऊर्ध्वस् तस्थौ नेम् अव ग्लापयन्ति। (अ०वे० °त)। ऋ०वे० १.१६४.१०[२]; अ०वे० ९.९.१०[२]

ऊर्ध्वस् तिष्ठति तिष्ठतः। आ०ब्रा० ७.१५.३[२]; शा०श्रौ०सू० १५.१९[२]

ऊर्ध्वस् तिष्ठ ध्रुवस् इत्यादि। देखें-ऊर्ध्वा तिष्ठ ध्रुवा।

ऊर्ध्वस् तिष्ठन् मा दिवा स्वाप्सीः। कौ० सू० ५६.१२ देखें-दिवा मा स्वा°, मा दिवा तथा मा सुषुप्थाः।

ऊर्ध्वस् तिष्ठन् रक्षाप्रमादम् अस्तृतेमम्। अ०वे० १९.४६.२[१]

ऊर्ध्वस् तिष्ठा न ऊतये। ऋ०वे० १.३०.६[१]; अ०वे० २०.४५.३[१]; सा०वे० २.९५१[१]

ऊर्ध्वस् सप्त ऋषीन् उप तिष्ठस्व। पं०वि०ब्रा० १.५.५. प्रतीकः ऊर्ध्वः। ला०श्रौ०सू० २.५.६

ऊर्ध्वः सुप्तेषु जागार। अ०वे० ११.४.२५[१]

ऊर्ध्वा अपवतं ताश् च। तै०आ० १.९.२[५]

ऊर्ध्वा अवाचीः पुरुषे तिरश्चीः। अ०वे० १०.२.११[४]

ऊर्ध्वा अस्य समिधो भवन्ति। अ०वे० ५.२७.१[१]; वा०सं० २७.११[१]; तै०सं० ४.१.८.१[१]; मै०सं० २.१२.६[१], १४९.१४; का०सं० १८.१७[१]; श०ब्रा० ६.२.१.३१, ३२; आप०श्रौ०सू० १६.७.९, २०.२०.८; मा०श्रौ०सू० ६.२.२. प्रतीकः ऊर्ध्वा अस्य। वै० सू० १०.१३; का०श्रौ०सू० १६.१.१२; कौ० सू० २.३.७, ४५.८

ऊर्ध्वा अस्या अङ्गयो वि श्रयन्ते। ऋ०वे० ७.७८.१[२]

ऊर्ध्वा तस्थौ त्रयविं रेरिहाणा। ऋ०वे० ३.५५.१४[२]

ऊर्ध्वा (तै०आ० ऊर्ध्वस्) तिष्ठ ध्रुवा (तै०आ० ध्रुवस्) त्वं। तै०सं० ४.१.६.३[४], ५.१.७.४; मै०सं० २.७.६[२], ८१.२१; का०सं० १६.६[४], १९.७; तै०आ० ४.३.३[४], ५.३.७ देखें-उद् उ तिष्ठ ध्रुवा।

ऊर्ध्वा तिष्ठस्य अमृतस्य केतुः। ऋ०वे० ३.६१.३[२]

ऊर्ध्वा ते अनु सूनृता। ऋ०वे० १.१३४.१[४]

ऊर्ध्वा दिक्। अ०वे० ३.२७.६; मै०सं० १.५.४, ७१.१४, २.७.२०, १०५.१६, २.८.३, १०८.९, २.८.९, ११४.७, २.१३.२१, १६७.११; का०सं० ७.२, ३९.७; तै०ब्रा० ३.११.५.३; आप०श्रौ०सू० ६.१८.३ देखें-ऊर्ध्वा दिशाम् तथा बृहती दिक्।

ऊर्ध्वादिगधिपतये ब्रह्मणे नमः। मा०श्रौ०सू० ११.७.१

ऊर्ध्वा दिशां रन्तिर् आशौषधीनाम्। तै०सं० ४.४.१२.४[१]; मै०सं० ३.१६.४[१], १८९.४; का०सं० २२.१४[१]; आ०श्रौ०सू० ४.१२.२[१]

ऊर्ध्वा दिशाम्। तै०सं० ४.३.३.२ देखें–ऊर्ध्वा दिक्।

ऊर्ध्वा धीतिः प्रत्य् अस्य प्रयामनि। ऋ०वे० १.११९.२[१]

ऊर्ध्वा नः सन्तु कोम्या वनानि। ऋ०वे० १.१७१.३[३]

ऊर्ध्वानां रुद्राणां (तै०आ० १.१७.२, रुद्राणीनां) स्थाने स्वतेजसा भानि। तै०आ० १.१७.१, २

ऊर्ध्वान्तरिक्षम् उप तिष्ठस्व। तै०सं० ३.४.२.२; का०सं० १३.११[३], १२

ऊर्ध्वां दधानः शुचिपेशसं धियम्। ऋ०वे० १.१४४.१[२]

ऊर्ध्वां धीतिं कृणवद् धारयच् च। ऋ०वे० ७.६४.४[२]

ऊर्ध्वान् नः कर्त जीवसे। ऋ०वे० १.१७२.३[३]

ऊर्ध्वा भवन्ति दर्शता यजत्राः। ऋ०वे० ३.५७.४[४]

ऊर्ध्वा भवन्ति पितरेव मेधाः। ऋ०वे० ३.५८.२[२]

ऊर्ध्वाम् आ तिष्ठ। (वा०सं०। श०ब्रा० रोह)। वा०सं० १०.१४; तै०सं० १.८.१३.२; मै०सं० २.६.१०, ७०.१; का०सं० १५.७; तै०ब्रा० १.७.७.२; श०ब्रा० ५.४.१.७

ऊर्ध्वाम् एनाम् (वा०सं० २३.२७[१]; श०ब्रा० १३.५.२.६ (एक बार); ला०श्रौ०सू० ९.१०.४[१], ऊर्ध्वं एनं) उच्छ्रयतात्। (वा०सं० २३.२६[१]; श०ब्रा० १३.२.९.२, ५.२.६ (एकबार), उच्च्छ्रापय; मै०सं० उङ् श्रापय)। वा०सं० २३.२६[१], २७[१]; तै०सं० ७.४.१९.२[१]; मै०सं० ३.१३.१[१], १६८.१; का०सं० अश्व० ४.८[१]; श०ब्रा० १३.२.९.२, ५.२.६ (द्वितीयांश); तै०ब्रा० ३.९.७.१; आ०श्रौ०सू० १०.८.१२[१], १३[१]; शा०श्रौ०सू० १६.४.२[१]; वै० सू० ३६.३१[१]; ला०श्रौ०सू० ९.१०.३[१], ४[१]; आप०श्रौ०सू० २०.१८.५. प्रतीकः ऊर्ध्वं एनं। वै० सू० ३६.३२, शा०श्रौ०सू० १६.४.६

ऊर्ध्वा यच् छ्रेणिर् न शिशुर् दन्। ऋ०वे० १०.६१.२०[३]

ऊर्ध्वा यत् ते त्रेतिनी भूत्। ऋ०वे० १०.१०५.९[१]

ऊर्ध्वाय नमः। तै० ऐ० आ० १०.१६

ऊर्ध्वा यस्याम् अतिर्भा अदिद्युतत् (वा०सं०काण्व० अतिद्युतत्) सवीमनि। अ०वे० ७.१४.२[१]; सा०वे० १.४६४[३]; वा०सं० ४.२५[३]; वा०सं०काण्व० ४.८.३; तै०सं० १.२.६.१[३]; मै०सं० १.२.५[३], १४.६; का०सं० २.६[३]; श०ब्रा० ३.३.२.१२[३]; आ०श्रौ०सू० ४.६.३[३]; शा०श्रौ०सू० ५.९.७[३]; नि० ६.१२

ऊर्ध्वाया दिशः शालाया नमो महिम्ने स्वाहा देवेभ्यः स्वाह्येभ्यः। अ०वे० ९.३.३०

ऊर्ध्वाया दिशोऽभिदासन्त्य अस्मान्। अ०वे० ४.४०.७[२]

ऊर्ध्वायां त्वा दिशि पुरा संवृतः स्वधायाम् आ दधामि। अ०वे० १८.३.३५

ऊर्ध्वायां त्वा दिशि मरुतश् चाङ्गिरसश् च देवाः षड्द्वितीयांश चैव पञ्चविंशैर् अहोभिर् अभिषिञ्चन्त्य् एतेन च तृचेनैतेन च यजुषैताद्वितीयांश च व्याहृतिभिः पारामेष्ठ्याय। आ०ब्रा० ८.१९.१

ऊर्ध्वायां दिशि यज्ञः संवत्सरो यज्ञपतिर् मार्जयन्ताम्। (आ०श्रौ०सू० संवत्सरः प्रजापतिर् मार्जयताम्) तै०सं० १.६.५.२; आ०श्रौ०सू० १.११.७ देखें–ऊर्ध्वया दिशा।

ऊर्ध्वायां दिश्य् अजस्यानूकं धेहि। अ०वे० ४.१४.८[३]

ऊर्ध्वायै त्वा दिशे बृहस्पतयेऽधिपतये श्वित्राय रक्षित्रे वर्षायेषुमते। अ०वे० १२.३.६० तुल०– अ०वे० ३.२७.६।

ऊर्ध्वायै दिशे नमः। का०सं० अश्व० ११.५

ऊर्ध्वायै दिशे स्वाहा। वा०सं० २२.२४; तै०सं० ७.१.१५.१; मै०सं० ३.१२.८, १६३.६; का०सं० अश्व० १.६

ऊर्ध्वारोहद् रोहिणी। तै० ब्रा० १.२.१.२७[३]; आप०श्रौ०सू० ५.१८.२[३]

ऊर्ध्वा शुक्रा शोचींष्य् अग्नेः। अ०वे० ५.२७.१[२]; वा०सं० २७.११[२]; तै०सं० ४.१.८.१[२]; मै०सं० २.१२.६[२], १४९.११; का०सं० १८.१७[२]; श०ब्रा० ६.२.१.३२

ऊर्ध्वा शोचींषि देवयून्य् अस्थुः। ऋ०वे० ७.४३.२[४]

ऊर्ध्वा शोशींषि प्रस्थिता रजांसि। ऋ०वे० ३.४.४[२]

ऊर्ध्वाः शुक्रा आहुत्याः पुरस्तात्। अ०वे० १२.१.१३[४]

ऊर्ध्वासस् त्वान्व् इन्दवः। ऋ०वे० ७.३१.९[१]

ऊर्ध्वासि। तै०सं० ४.४.७.१, ५.३.११.१; मै०सं० २.१३.१८, १६४.१७; का०सं० ३९.९

ऊर्ध्वास् तस्थुर् मम्रुषीः प्रायवे पुनः। ऋ०वे० १.१४०.८[२]

ऊर्ध्वा हि ते दिवे-दिवे। ऋ०वे० ८.४५.१२[१]

ऊर्ध्वेव स्नाती दृशये नो अस्थात्। ऋ०वे० ५.८०.५[२]

ऊर्ध्वो अग्निः सुमतिं वस्वो अश्रेत्। ऋ०वे० ७.३९.१[१]; आ०ब्रा०५.१८.८; का०ब्रा० २६.१५; आ०श्रौ०सू० ८.१०.१. प्रतीकः ऊर्ध्वो अग्निः। शा०श्रौ०सू० १०.११.५ तुल०– बृ. दा. ५.१६९।

ऊर्ध्वो अग्निः सुमनाः प्रातर् अस्थात्। ऋ०वे० ५.१.२[२]; सा०वे० २.१०९७[२]; मै०सं० २.१३.७[२], १५५.१८

ऊर्ध्वो अध्वरं दिवि देवेषु धेहि। वा०सं० ३७.१९; श०ब्रा० १४.१.४.१४ तुल०– ऊर्ध्वं इमम् अध्वरं इत्यादि।

ऊर्ध्वो अध्वरं दिवि देवेषु होत्रा इत्यादि। देखें–'ऊर्ध्वं इमम् अध्वरं' इत्यादि।

ऊर्ध्वो अध्वरो अस्थात्। (वा०सं०। श०ब्रा० ऽध्वर आस्थात्; का०सं० ऽध्वरे स्थाः; आप० श्रौ०सू० अध्वरे स्थात्)। वा०सं० २.८; मै०सं० १.१०.२, १४१.७; का०सं० ९.५; श०ब्रा० १.४.५.३; आप०श्रौ०सू० ८.१२.४ तुल०– अगला।

ऊर्ध्वो अध्वरो दिविस्पृक्। मै०सं० १.१.१३[१], ८.१०, ४.१.१४[१], १९.७; का०सं० १.१२, ३१.११. प्रतीकः ऊर्ध्वो अध्वरः। मा०श्रौ०सू० १.३.१.१५ देखें–समारभ्योर्ध्वो तथा तुल०– पूर्व का।

ऊर्ध्वो अध्वर्युर् जुजुषाणो अस्थात्। ऋ०वे० ४.६.४[२]

ऊर्ध्वो गन्धर्वो। (अ०वे० रोहितो) अधि नाके अस्थात्। ऋ०वे० ९.८५.१२[१], १०.१२३.७[१]; अ०वे० १३.१.११[१]; सा०वे० २.११९७[१]

ऊर्ध्वो ग्रावा बृहद् अग्निः समिद्धः। ऋ०वे० १०.७०.७[१]

ऊर्ध्वो ग्रावा वसवोऽस्तु सोतरि। ऋ०वे० १०.१००.९[१]

ऊर्ध्वोऽध्वर आस्थात् इत्यादि। देखें–ऊर्ध्वो अध्वरो अस्थात्।

ऊर्ध्वो नः पाह्य् अंहसो नि केतुना। ऋ०वे० १.३६.१४[१]; मै०सं० ४.१३.१[१], १९९.९; का०सं० १५.१२[१]; आ०ब्रा०२.२.१९[१]; का०ब्रा० १०.२; तै०ब्रा० ३.६.१.२[१]. प्रतीकः ऊर्ध्वो नः पाह्य् अडहसः। आ०ब्रा० १.२२.८; तै०आ० ४.२०.१; ऊर्ध्वो नः। शा०श्रौ०सू० ५.१५.३ तुल०– 'ऊर्ध्वो मा' इत्यादि।

ऊर्ध्वो नाकस्याधि रोह विष्टपम्। अ०वे० ११.१.७[३]

ऊर्ध्वो नु सृष्टा३स् तिर्यङ् नु सृष्टा३ः। अ०वे० १०.२.२८[१]

ऊर्ध्वो बिन्दुर् उद् अचरत्। अ०वे० १०.१०.१९[१]

ऊर्ध्वो भवति सोतवे। ऋ०वे० १.२८.१[२]

ऊर्ध्वो भव प्रति विध्याध्य् अस्मत्। ऋ०वे० ४.४.५[१]; वा०सं० १३.१३[१]; तै०सं० १.२.१४.२[१]; मै०सं० २.७.१५[१], ९७.१५; का०सं० १६.१५[१]

ऊर्ध्वो भव सुक्रतो देवयज्या। ऋ०वे० १०.७०.१[४]

ऊर्ध्वो भुवन् मनुषे दस्मतमः। ऋ०वे० २.२०.६[२]

ऊर्ध्वो मा पाह्य् अंहसः। वा०सं० ४.१०[२]; श०ब्रा० ३.२.१.३५[२] तुल०– ऊर्ध्वो नः पाह्य्।

ऊर्ध्वो मा पाह्य् ओदृचः। तै०सं० १.२.२.३ देखें–ऊर्जो मा।

ऊर्ध्वो रोहितो इत्यादि। देखें–ऊर्ध्वो गन्धर्वो।

ऊर्ध्वो वां गातुर् अध्वरे अकारि। ऋ०वे० ३.४.४[१]

ऊर्ध्वो वाजस्य सनिता यद् अञ्जिभिः। ऋ०वे० १.३६.१३[३]; सा०वे० १.५७[३]; वा०सं० ११.४२[३]; तै०सं० ४.१.४.२[३]; मै०सं० २.७.४[३], ७८.१४; का०सं० १५.१२[३], १६.४[३]; आ०ब्रा०२.२.१६; श०ब्रा० ६.४.३.१०; तै०ब्रा० ३.६.१.२[३]; महाना०उप०२०.६[३]

ऊर्ध्वो वाम् अग्निर् अध्वरेष्व् अस्थात्। ऋ०वे० ६.६३.४[१]

ऊर्ध्वो विराजन्न् अप सेध शत्रून्। हि०गृ०सू० १.२७.७[२] नीचे देखें– उग्रो वि°।

ऊर्ध्वो विवक्ति सोमसुद् युवभ्याम्। ऋ०वे० ७.६८.४[२]

ऊर्ध्वो ह्य् अस्थाद् अध्य् अन्तरिक्षे। ऋ०वे० २.३०.३[१]

ऊर्मिणा (तै०सं० ऊर्मिणीर्) मधुमत्तमाः। तै०सं० १.१.३.१[२]; मै०सं० ४.१.३[२], ५.८; का०सं० १.३[२]; का०श्रौ०सू० ४.२.३२[२]; मा०श्रौ०सू० १.१.३.३२[२]; शा०गृ०सू० १.२८.८[२]

ऊर्मिं न बिभ्रद् अर्षसि। ऋ०वे० ९.४४.१[२]; सा०वे० १.५०९[२]

ऊर्मिं प्र हेत य उभे इयर्ति। ऋ०वे० १०.३०.९[२]

ऊर्मिर् द्रप्सो अपाम् असि। वा०सं० १४.५; तै०सं० ४.३.४.३; मै०सं० २.८.१[४], १०७.७; का०सं० १७.१[२]; श०ब्रा० ८.२.१.१०

ऊर्मिर् न नावम् आ वधीत्। ऋ०वे० ८.७५.९[३]; तै०सं० २.६.११.२[३]; मै०सं० ४.११.६[३], १७५.११; का०सं० ७.१७[३]; नि० ५.२३[३]

ऊर्मिर् न निम्नैर् द्रवयन्त वक्वाः। ऋ०वे० १०.१४८.५[४]

ऊर्मिर् यस् ते पवित्र आ। ऋ०वे० ९.६४.११[१]

ऊर्व इव पप्रथे कामो अस्मे। ऋ०वे० ४.३०.१९[३]; नि० ६.७ देखें–उर्व इव।

ऊर्वं गव्यं परिषदन्तो अग्मन्। ऋ०वे० ४.२.१७[४]; का०सं० १३.१५[४] देखें–उर्वीं गव्यां।

ऊर्वं गव्यं महि गृणान इन्द्र। ऋ०वे० ६.१७.१[२]; आ०ब्रा०५.१८.१३; ऐ०आ० १.२.२.७

ऊर्वं दयन्त इत्यादि। देखें–अगला एक।

ऊर्वाद् देवानाम् उत मर्त्यानाम्। ऋ०वे० ४.१२.५[२]; मै०सं० ४.११.१[२], १६२.९; का०सं० २.१५[२]

ऊर्वान् (सा०वे० ऊर्वं) दयन्त गोनाम्। ऋ०वे० ७.१६.७[४]; सा०वे० १.३८[४]; वा०सं० ३३.१४[४]

ऊर्वः। शा०श्रौ०सू० ७.५.२३; वै० सू० २०.८. ऊमैः का विकार, पितृभिर्, । देखें–और्वैः।

ऊर्वोर् उपस्थे जङ्घयोः। सा०मं०ब्रा० १.३.५[१]

ऊर्वोर् ओजः। अ०वे० १९.६०.२; वै० सू० ३.१४; मा०श्रौ०सू० ५.२.१५.२०; पा०गृ०सू० १.३.२५ देखें–ऊरुवोर्।

ऊर्व्य् अन्तरिक्षं वीहि। देखें–उर्व् अन्तरिक्षं वीहि।

ऊलेन परिमीढोऽसि। हि०गृ०सू० १.१४.२[३] नीचे देखें– उतूल।

ऊलो हलीक्ष्णो वृषदंशस् ते धातुः। तै०सं० ५.५.१२.१ देखें–उलो।

ऊवध्यं वातं (मै०सं० वातात्) सब्वं तद् आरात्। वा०सं० १९.८४[४]; मै०सं० ३.११.९[४], १५३.१०; का०सं० ३८.३[४]; तै०ब्रा० २.६.४.२[४]

ऊवध्यगोहं पार्थिवं खनतात्। मै०सं० ४.१३.४, २०४.१; का०सं० १६.२१; आ०ब्रा०२.६.१६; तै०ब्रा० ३.६.६.३; आ०श्रौ०सू० ३.३.१; शा०श्रौ०सू० ५.१७.७; आप०श्रौ०सू० ७.१६.१. प्रतीकः ऊवध्यगोहम्। शा०श्रौ०सू० १५.१.२६

ऊषा (पढें– उषा) ददृशे न पुनर् यतीव। पं०वि०ब्रा० २५.८.४[४] देखें–उषो ददृक्षे।

ऊषान् कृष्णम् अवतु कृष्णम् ऊषाः। तै० ब्रा० १.२.१.२[३]; आप०श्रौ०सू० ५.१.७[३]

ऊष्मण्यापिधाना चरूणाम्। ऋ०वे० १.१६२.१३[३]; वा०सं० २५.३६[३]; तै०सं० ४.६.९.१[३]; मै०सं० ३.१६.१[३], १८३.५; का०सं० अश्व० ६.४[३]

ऊह्याते जनाँ अनु। ऋ०वे० १.१२०.११[२]

ऊह्याथे सनाद् ऋतम्। ऋ०वे० ४.५६.६[३]; सा०वे० २.९४७[३]

ऋ

ऋक् च त्वा साम च श्रीणीताम्। का०सं० ३५.११

ऋक् च मे साम च मे। तै०सं० ४.७.९.१, ५.४.८.४ (देखें–अगला)

ऋक् च साम च। वा०सं० १८.२९; मै०सं० २.११.६, १४४.१; का०सं० १८.१२, २१.११; श०ब्रा० ९.३.३.१४ (देखें–पूर्व)

ऋक् त्वं असि सामाहम्। शा०गृ० १.१३.४[४]; मा०श्रौ०सू० १.१०.१५[४] (देखें–सामाहम्)

ऋक्वभिः शूर नोनुमः। ऋ०वे० ८.६३.११[२]

ऋक्वाणो अग्निम् इन्धते। ऋ०वे० ३.१३.५[३]

ऋक्षग्रीवं प्रमीलिनम्। अ.वे. ८.६.२[४]

ऋक्षमाच् इत्यादि। (देखें– ऋक्समाच्)

ऋक्षलाभिः कपिञ्जलान्। वा०सं० २५.३ (नीचे देखें– अछलाभिः)

ऋक्षीकां रक्षो अप बधयास्मत्। अ.वे. १२.१.४९[४]

ऋक्षीकाभ्यो नैषादम्। वा०सं० ३०.८; तै०ब्रा० ३.४.१.५

ऋक्षेभ्यः। (जाँचें– नमः)। मा०श्रौ०सू० २.१२.१७

ऋक्षो जतूः सुषिलीका (मै०सं० शुशुलूका) त इतरजनानाम्। वा०सं० २४.३६; मै०सं० ३.१४.१७, १७६.४

ऋक्षो न वो मरुतः शिमीवां अमः। ऋ०वे० ५.५६.३[३]

ऋक्समाच् (तै०सं० °षमाच्) छुक्रः। (मै०सं० ओसमाङ् शु°)। वा०सं० १३.५६; तै०सं० ४.३.२.२; मै०सं० २.७.१९, १०४.१७; का०सं० १६.१९; श०ब्रा० ८.१.२.२

ऋक् साम यजुर् उच्छिष्टे। अ०वे० ११.७.५[१]

ऋक् साम यजुर् वषट् स्वाहा नमः। तै०सं० ७.३.१२.१; का०सं० अश्व० ३.२

ऋक्सामयोः शिल्पे स्थः। वा०सं० ४.९; तै०सं० १.२.२.१, ६.१.३.१; मै०सं० १.२.२, १०.१७; का०सं० २.३, २३.३; श०ब्रा० ३.२.१.५; आप०श्रौ० १०.८.१६; मा०श्रौ० २.१.२.४. प्रतीकः ऋक्सामयोः। का०श्रौ० ७.३.२३

ऋक्सामाभ्यां यजुषा संतरन्तः। (वा०सं० का०सं० । श०ब्रा० मा०श्रौ० °भ्यां संतरन्तो यजुर्भिः)। वा०सं० ४.१[३]; तै०सं० १.२.३.३[३], ३.१.१.४; का०सं० २.४[३], २३.६; श०ब्रा० ३.१.१.१२; मा०श्रौ० २.१.१.६[३]

ऋक्सामाभ्याम् अभिहितौ। ऋ०वे० १०.८५.११[१]; अ०वे० १४.१.११[१]. प्रतीकः ऋक्सामाभ्याम्. वृ०ध० ८.४०

ऋक्सामाभ्यां प्र रथं वर्तयन्ति। ऋ०वे० १०.११४.६[४]

ऋग् असि जन्मना वशा, सा साम गर्भम् अधत्थाः, सा मया संभव। मै०सं० २.१३.१५, १६४.३ (देखें–ऋग् वशा)

ऋग्भिः पूतं प्रजापतिः। वै० सू० ६.१[१]

ऋग्भिः पूर्वाह्णे दिवि देव ईयते। तै० ब्रा० ३.१२.९.१[१]

ऋग्भिः पृथिवीं यजुषान्तरिक्षम्। गो०ब्रा० १.५.२५[१]

ऋग्भिर् अन्नादः। तै०सं० ४.४.८.१; का०सं० ३९.११

ऋग्भिर् एवोभयतोथर्वाङ्गिरोभिर् गुप्ताभिर् गुप्तै स्तुत। गो०ब्रा० २.२.१४

ऋग्भि स्तुवन्तो अहर्–अहः पृथिव्याः। गो०ब्रा० १.५.२४[३]

ऋग्भिः सह गायत्रं जागतम् आहुः। गो०ब्रा० १.५.२५[१]

ऋग्भिः साम्ना यजुर्विधा। अ०वे० १२.१.३८[४]

ऋग्भि: सुशस्तो यजुषा परिष्कृत:। गो०ब्रा० १.५.२५[१]

ऋग्भ्यस् तं निर् भजामो योऽस्मान् द्वेष्टि यं वयं द्विष्म:। अ०वे० १०.५.३०

ऋग्भ्य: स्वाहा। तै०सं० ७.५.११.२; का०सं० अश्व० ५.२. प्रतीक: ऋग्भ्य:। बौ०ध०सू० ३.९.४

ऋग्भ्यो जातं वैश्यं वर्णम् आहु:। तै० ब्रा० ३.१२.९.२[१]

ऋग्भ्यो जातं सर्वशो मूर्तिम् आहु:। तै० ब्रा० ३.१२.९.१[१]

ऋग्मिभिर् ऋग्मी गातुभिर् ज्येष्ठ:। ऋ०वे० १.१००.४[३]

ऋग् वशा बृन्द्रथंतरे गर्भ: प्रैषनिविदो जरायु यज्ञो वत्सो दक्षिणा (आप०श्रौ० दक्षिणा:) पीयूष:। का०सं० ३९.८; आप०श्रौ० १६.३२.४ देखें- ऋग् असि।

(ओम्)। ऋ०वे० तर्पयामि। बौ०ध०सू० २.५.९.१४

ऋग्वेदस्य पृथिवी स्थानम्। गो०ब्रा० १.५.२५[१]

ऋग्वेदे त्वं समुत्पन्ना। ऋ०वे०खि० १०.१२७.६[३]

ऋघायतो अभियुजो भयन्ते। ऋ०वे० ४.३८.८[२]

ऋघायतो अरभयन्त मन्यवे। ऋ०वे० १०.११३.६[२]

ऋघायन्त सुभ्व: पर्वतास:। ऋ०वे० ४.१७.२[३]

ऋघायमाण इन्वसि। ऋ०वे० १.१७६.१[३]

ऋघायमाणम् इन्वत:। ऋ०वे० १.१०.८[२]

ऋघायमाणो निरिणाति शत्रून्। ऋ०वे० १.६१.१३[४]; अ०वे० २०.३५.१३[४]

ऋच: पदं मात्रया कल्पयन्त:। अ०वे० ९.१०.१९[१]

ऋच: पुरोनुवाक्याभि:। वा०सं० २०.१२; श०ब्रा० १२.८.३.३० (देखें-ऋचस् त्वा पुरो० तथा ऋचो याज्या०)

ऋच: प्राचीनाताना:। आ०ब्रा० ८.१७.२

ऋच: प्राञ्च आ ताना यजूंषि तिर्यञ्च: सामान्य आ स्तरणं श्रीर् उपबर्हणं वाकोवाक्यम् अतीरोका वारवन्तीयं संधयोर् आजनम् आत्मा प्रतिष्ठा यज्ञायज्ञीयम्। ला०श्रौ० ३.१२.७

ऋचं वाचं प्रपद्ये। वा०सं० ३६.१ (देखें-वाचम् ऋचं)

ऋचं वाचं ब्राह्मणम् आ बभूवु: (?) । जै०ब्रा० २.५१ (५२)[२]

ऋचं साम यजामहे। अ०वे० ७.५४.१[१]; सा०वे० १.३६९[१]; गो०गृ० ३.२.४८. प्रतीक: ऋचं साम। ला०श्रौ० १.११.११; कौ० सू० ४२.९; ख०गृ०सू० २.५.३४; सा० वि० ब्रा० ३.९.१

ऋचं साम यद् अप्राक्षम्। अ.वे. ७.५४.२[१]

ऋचं गाथां ब्रह्म परं जिगांसन्। कौ० सू० १३५.९[२]

ऋचस् ते महिमा। (बौ०ध०सू० महिमा दत्तस्याप्रमादाय)। हि०गृ०सू० २.१३.१; आ०मं०पा० २.१९.१४ (आप०गृ० ८.२१.६)। बौ०ध०सू० २.८.१४.१२

ऋचस् त्वा दीक्षमाणम् अनुदीक्षन्ताम्। तै० ब्रा० ३.७.७.८; आप०श्रौ० १०.११.१ (तुल०- वाचं म ऋचो)

ऋचस् त्वा पुरोनुवाक्याभि:। मै०सं० ३.११.८, १५१.११ (नीचे देखें- ऋच: पुरो०)

ऋच: साम यजुर् मही। अ०वे० १०.७.१४[२]

ऋच: सामाथो यजु:। अ०वे० ११.८.२३[४]

ऋच: सामानि छन्दांसि। अ०वे० ११.७.२४[१]

ऋच: सामानि जज्ञिरे। ऋ०वे० १०.९०.९[२]; अ०वे० १९.६.१३[२]; वा०सं० ३१.७[२]; तै०आ० ३.१२.४[२]

ऋच: सामानि बिभ्रती। अ०वे० १०.१०.१४[४]

ऋच: सामानि भेषजा। अ०वे० ११.६.१४[२]

ऋच: सामानि यजूंषि.तै०ब्रा० १.२.१.२६[३]

ऋचा कपोतं नुदत प्रणोदम्। ऋ०वे० १०.१६५.५[१]; अ०वे० ६.२८.१[१]; मा०श्रौ०सू० २.१७.१[१]. प्रतीक: ऋचा कपोतम्। कौ० सू० ४६.७

ऋचा कुम्भीम् अध्य् अग्नौ श्रयामि। अ०वे० ९.५.५[१]. प्रतीक: ऋचा कुम्भीम्। कौ० सू० ६४.११

ऋचा गिरा मरुतो देव्य् अदिते। ऋ०वे० ८.२७.५[३]

ऋचा त्वा छन्दसा सादयामि। मै०सं० २.१३.४, १५३.१३; आप०श्रौ० १७.१०.१; मा०श्रौ० ६.२.२

ऋचा दीक्षे यजुषा दीक्षे साम्ना दीक्षे पृथिव्या दीक्षेऽन्तरिक्षेण दीक्षे दिवा दीक्षे. । जै०ब्रा० २.६५(६४)

ऋचां त्व: पोषम् आस्ते पुपुष्वान्। ऋ०वे० १०.७२.११[१]; नि० १.८[१]

ऋचा प्राणिहि। शा०गृ० १.२४.२

ऋचा मित्रं हवामहे। ऋ०वे० ५.६४.१[२]

ऋचां प्राची महती दिग् उच्यते। तै० ब्रा० ३.१२.९.१[१]; आप०श्रौ० १९.१५.६

ऋचा यामि मरुतो ब्रह्मणस्पतिम्। (सा०वे० °पते)। ऋ०वे० ८.२७.१[३]; सा०वे० १.४८[३]; मै०सं० ४.१२.१[३],. १७८.१४; का०सं० १०.१३[३]

ऋचा वनेमानृचः। ऋ०वे० १०.१०५.८[२]

ऋचा शोचन्तः संदहन्तो अव्रतान्। ऋ०वे० ९.७३.५[२]

ऋचा साम्ना यजुषा देवताभिः। तै० ब्रा० ३.७.६.१३[२]; आप०श्रौ० ४.८.४[२]

ऋचा स्तोमं समर्धय। वा०सं० ११.८[१]; तै०सं० ३.१.१०.१[१], ४.१.१.३[१], ५.१.१.३; मै०सं० २.७.१[१], ७४.१०, ३.१.१, २.५; का०सं० १५.११[१], १८.१९; श०ब्रा० ६.३.१.२०[१]; आप०श्रौ० ११.२०.१, १६.१.७; मा०श्रौ० २.३.६.१८, ६.१.१; कौ० सू० ५.७[१]. प्रतीकः ऋचा स्तोमम्। वै० सू० १८.६, २८.७; मा०श्रौ०सू० १.१०.११

ऋचीषमायाध्रिगव ओहम्। ऋ०वे० १.६१.१[३]; अ०वे० २०.३५.१[३] (खण्डः अध्रिगव ओहम् इन्द्राय। नि० ५.११)

ऋचे त्वा। वा०सं० १३.३९; तै०सं० ४.२.९.६, ४.६.२, १०.१; मै०सं० २.७.१७, १०१.१४, २.१३.२० (द्वितीयांश), १६५.१३, १६६.१०; का०सं० १६.१६, २२.५; श०ब्रा० ७.५.२.१३; तै० ऐ आ० १०.४०; का०श्रौ० १७.५.९; आप० श्रौ० १.१६.२७.२, १७.५.७, ६.११; मा०श्रौ० ६.१.७ (द्वितीयांश), ८.१९

ऋचेमं यज्ञं नो नय। (तै०सं० वह)। वा०सं० १८.६३[३]। तै०सं० ५.७.७.२[३]; का०सं० ४०.१३[३]; श०ब्रा० ९.५.१.४८[३]

ऋचे सम् अनमत्। तै०सं० ७.५.२३.२; का०सं० अश्व० ५.२०

ऋचो अक्षरे (नृ०पू०ता०उप० ऽक्षरे) परमे व्योमन्। ऋ०वे० १.१६४.३९[१]; अ०वे० ९.१०.१८[१]; गो०ब्रा० १.१.२२; तै०ब्रा० ३.१०.९.४[१]; तै०आ० २.११.१[१]; श्वेत०उप०४.८[१]; नृ०पू०ता०उप० ४.२[१], ५.२[१]; नि० १३.१०[१]

ऋचो गिरः सुष्टुतयः सम् अग्मत। ऋ०वे० १०.९१.१२[२]

ऋचो नामास्मि यजूंषि नामास्मि सामानि नामास्मि। वा०सं० १८.६७

ऋचोऽनु वि क्रमेऽहम्। अ.वे. १०.५.३०

ऋचो यजूंषि सामानि। तै० ब्रा० ३.१२.८.१[१]

ऋचो यस्यानूक्यम्। अ.वे. ९.६.१[३]

ऋचो याज्याभिः। का०सं० ३८.४; तै०ब्रा० २.६.५.८ (नीचे देखें- ऋचः पुरो°)

ऋचोर् गर्भेऽध्याहित. । जै०ब्रा० २.१३[३] (पृछ्येन का भाग)

ऋचो विद्वान् पृथिवीं वेद संप्रति। गो०ब्रा० १.५.२५[१]

ऋचोऽस्य भागांश् चतुरो वहन्ति। गो०ब्रा० १.५.२४[१]

ऋछन्ति ष्म निष्पदो मुद्गलानीम्। ऋ०वे० १०.१०२.६[४]

ऋछरा ये च ते शफाः। अ०वे० १०.९.२३[२]

ऋजवे त्वा। वा०सं० ३७.१०; मै०सं० ४.९.१, १२२.३; का०सं० अ० १.८; श०ब्रा० १४.१.२.२२; तै०आ० ४.३.३, ५.३.७; का०श्रौ० २६.१.२५; मा०श्रौ० ४.१.२७

ऋजवे स्वाहा। तै०सं० ७.१.१७.१

ऋजिप्य ईम् इन्द्रावतो न भुज्युम्। ऋ०वे० ४.२७.४[१]

ऋजिप्यं श्येनं प्रुषितप्सुम् आ शुम्। ऋ०वे० ४.३८.२[३]

ऋजिप्यासो न वयुनेषु धूर्षदः। ऋ०वे० २.३४.४[४]

ऋजिश्वने दात्रं दाशुषे दाः। ऋ०वे० ६.२०.७[४]

ऋजिश्वने वैदथिनाय रन्धीः। ऋ०वे० ४.१६.१३[२]

ऋजीतिभी रशनाभिर् गृभीतान्। ऋ०वे० १०.७९.७[२]

ऋजीतिर् अग्न आ हुतिर् विवक्षसे। ऋ०वे० १०.२१.२[४]

ऋजीते परि वृङ्धि नः। ऋ०वे० ६.७५.१२[१]; वा०सं० २९.४९[१]; तै०सं० ४.६.६.४[१]; मै०सं० ३.१६.३[१], १८६.१७; आप०श्रौ० २०.१६.१२ (देखें-ज्याके तथा वृजीते)

ऋजीत्य् एनी रुशती महित्वा। ऋ०वे० १०.७५.७[१]

ऋजीपी श्येनो ददमानोअंशुम्। ऋ०वे० ४.२६.६[१]

ऋजीषिणं वृषणं सश्चत श्रिये। ऋ०वे० १.६४.१२[४]

ऋजीषी वज्री वृषभस् तुराषाट्। ऋ०वे० ५.४०.४[१]; अ०वे० २.१२.७[१]; गो०ब्रा० २.४.२. प्रतीकः ऋजीषी वज्री। शा०श्रौ० ७.२३.९; नि० ५.१२ (देखें-प्रदाता वज्री)

ऋजीषी शवसस् पते। (सा०वे० पतिः)। ऋ०वे० ८.९०.५[२]; सा०वे० १.२४८[२], २.७६१[२]

ऋजीषेणाजहान् मृत्युम्। वा०सं० १९.७२[२]; का०सं० ३८.१[२]; तै०ब्रा० २.६.२.१[२]

ऋजुः पवस्व वृजिनस्य हन्ता। ऋ०वे० ९.९७.४३[१]

ऋजुं च गातुं वृजिनं च सोम। ऋ०वे० ९.९७.१८[२]

ऋज्जुनीती नो वरुण:। ऋ०वे० १.९०.१[१]; सा०वे० १.२१८[१]; आ०ब्रा०६.६.२; का०ब्रा० २६.१०; गो०ब्रा० २.५.१२; आ०श्रौ० ७.२.१०; नि० ६.२१.

प्रतीक: ऋजुनीती न: शा०श्रौ० १२.२.१४; ऋजुनीती। शा०श्रौ० १०.९.१६

ऋजु मर्तेषु वृजिना च पश्यन्। ऋ०वे० ४.१.१७[४], ६.५१.२[३], ७.६०.२[४]

ऋजुमुष्कान् वृषण: शुक्राङ्श् च। ऋ०वे० ४.२.२[४]

ऋजुं पन्थाम् अनुपश्यमाना:। आप०श्रौ० १७.१३.२[२] (नीचे देखें- 'ऊर्ध्वं' इत्यादि)

ऋजु यक्षत: सम् ऋचा वपुष्टरा। ऋ०वे० २.३.७[२]

ऋजुर् इच् छङ्सो वनवद् वनुष्यत:। ऋ०वे० २.२६.१[१]

ऋजूयते नासत्या शचीभि:। ऋ०वे० १.११६.२३[२]

ऋजूयते यजमानाय सुन्वते। ऋ०वे० १०.१००.३[२]

ऋजूयते वृजिनानि ब्रुवन्त्:। ऋ०वे० ५.१२.५[४]

ऋजूयन्तम् अनु व्रतम्। ऋ०वे० १.१३६.५[५]

ऋजूयमानास तपन् महित्वा। ऋ०वे० १०.८८.९[४]

ऋज्यद् भूतं (वर्. लेच्त्. ऋग्य ऋग् भूतं) यद् असृज्यतेदम्। गो०ब्रा० १.१.९[३]

ऋञ्जम् उक्षण्यायने। ऋ०वे० ८.२५.२२[१] (तुल०- बृ०दा० ६.६६)

ऋञ्जा त्मना वहध्यइ। ऋ०वे० १०.२२.५[२]

ऋञ्जा वाजं न गध्यं युयूषन्। ऋ०वे० ४.१६.१[३]; नि० ५.१५

ऋञ्जाय् इन्द्रोत आददे। ऋ०वे० ८.६८.१५[१]

ऋञ्जाश्व: प्रष्टिभिर् अम्बरीष:। ऋ०वे० १.१००.१७[३]

ऋञ्जाश्वं तं पितान्धं चकार। ऋ०वे० १.११६.१६[२]; नि० ५.२१

ऋञ्जाश्व: शतम् एकं च मेषान्। ऋ०वे० १.११७.१८[४]

ऋञ्जासो मा पृथिविष्ठा: सुदास:। ऋ०वे० ७.१८.२३[३]

ऋञ्जसान: पुरुवार उक्थै:। ऋ०वे० ४.२१.५[३]

ऋण्कातिम् अदाभ्यम्। ऋ०वे० ८.६१.१२[२]

ऋणक् सपत्नान् अधरांश् च कृण्वत्। ऋ०वे०खि० १०.१२८.१०[३] (देखें-भिन्दत् सपत्नान् तथा नुदन् सपत्नान्)

ऋणंचयस्य प्रयता मघानि। ऋ०वे० ५.३०.१२[३]

ऋणंचये राजनि रुशमानाम्। ऋ०वे० ५.३०.१४[२]

ऋणम् अस्मिन् संनयति। आ०ब्रा० ७.१३.४[१]; शा०श्रौ० १५.१७[१]

ऋणरोगादि दारिद्र्यम्। ऋ०वे०खि० ५.८७.२९[१]

ऋणा च धृष्णुश् चयते। ऋ०वे० ९.४७.२[३]

ऋणा चिद् यत्र ऋणया न उग्र:। ऋ०वे० ४.२३.७[३]

ऋणाति पश्व: सुधितेव बर्हणा। ऋ०वे० १.१६६.६[४]

ऋणाद् ऋणम् इव सं नय। अ०वे० १९.४५.१[१]

ऋणान् नो नर्णम् एर्त्समान:। अ०वे० ६.११८.२[३] (देखें-नेन् न ऋणान् तथा नें न ऋणान्)

ऋणावानं न पतयन्त सर्गै:। ऋ०वे० १.१६७.७[४]

ऋणावा बिभ्यद् धनम् इछमान:। ऋ०वे० १०.३४.१०[३]

ऋणो: पुरो वि दुरो अस्य विश्वा:। ऋ०वे० ६.१८.५[४]

ऋणो न तायुर् अति धन्वा राट्। ऋ०वे० ६.१२.५[४]

ऋणोर् अक्षं न चक्र्यो:। ऋ०वे० १.३०.१४[३]; अ०वे० २०.१२२.२[३]; सा०वे० २.४३५[३]

ऋणोर् अक्षं न शचीभि:। ऋ०वे० १.३०.१५[३]; अ०वे० २०.१२२.३[३]; सा०वे० २.४३६[३]

ऋणोर् अप व्रजं द्विह:। ऋ०वे० ९.१०२.८[२]

ऋणोर् अप: सीरा न स्रवन्ती:। ऋ०वे० १.१७४.९[२], ६.२०.१२[२]

ऋणोर् अपो अनवद्यार्णा:। ऋ०वे० १.१७४.२[३]

ऋत इयं पृथिवी श्रिता। गो०गृ० २.१.७[३] (देखें-ऋते भूमिर् तथा तुलना ऋते समुद्र)

ऋतं यती सरमा गा अविन्दत्। ऋ०वे० ५.४५.७[३]

ऋतं येमान ऋतम् इद् वनोति। ऋ०वे० ४.२३.१०[१]

ऋतं येमु: सुध्य आशुषाणा:। ऋ०वे० ४.२.१४[४]

ऋतं यो अग्ने अनृतेन हन्ति। ऋ०वे० १०.८७.११[२]; अ०वे० ८.३.११[२]

ऋतं योनिः। मै०सं० २.१३.२, १५३.६

ऋतं वदन्त ऋतयुक्तिम् अग्मन्। ऋ०वे० १०.६१.१०[२]

ऋतं वदन्ताव् ऋतोद्येषु। अ०वे० १४.१.३१[२]

ऋतं वदन्तो अनृतं रपेम। अ०वे० १८.१.४[२] (देखें-'ऋता' इत्यादि)

ऋतं वदन्न् ऋतद्युम्न। ऋ०वे० ९.११३.४[१]

ऋतं वदिष्यामि। तै०आ० ७.१.१; तै०उप० १.१.१.; शा०गृ० ६.४.७; मा०श्रौ०सू० १.४.४

ऋतं वर्षिष्ठम् उप गाव आगुः। ऋ०वे० ३.५६.२[२]

ऋतं वोचे नमसा पृच्ह्यमानः। ऋ०वे० ४.५.११[१]

ऋतं शंसन्त ऋजु दीध्यानाः। ऋ०वे० १०.६७.२[१]; अ०वे० २०.९१.२[१]

ऋतं शंसन्त ऋतम् इत् त आहुः। ऋ०वे० ३.४.७[३], ७.८[३]

ऋतं सत्यं विजिग्यानं विवाचनम् अन्तो वाचो विभुः सर्वस्माद् उत्तरं ज्योतिर् ऊधर् अप्रतिवादः पूर्वं सर्वं वाक् पराग् अर्वाक् सप्रु सलिलं धस्नु पिन्वति। ऐ०आ० ५.३.२.१

ऋतं सत्यं तपो राष्ट्रम्। अ.वे. ११.७.१७[१]

ऋतं सत्यम्। तै०सं० ४.१.४.४, ५.१.५.८; शा०श्रौ० १४.१६.६ (देखें-अगला)

ऋतं सत्यम् ऋतं सत्यम्। वा०सं० ११.४७; मै०सं० २.७.४, ७९.९, ३.१.६, ८.३; का०सं० १६.४, १९.५; श०ब्रा० ६.४.४.१०; मा०श्रौ० ६.१.१. प्रतीकः ऋतं सत्यम्। का०श्रौ० १६.३.११ (देखें-पूर्व का)

ऋतं सत्यं परं ब्रह्म। तै०आ० १०.१२.१[१]; महाना०उप०१२.१[१]

ऋतं सत्येऽधाम्। (तै०ब्रा० आप०श्रौ० धायि) तै०सं० ७.१.१८.२; का०सं० अश्व० १.९.; तै०ब्रा० ३.७.७.४; आप०श्रौ० १०.९.४

ऋतं सत्ये प्रतिष्ठितम्। सा०मं०ब्रा० २.४.१०[१] (तुल०- गो०गृ० ४.५.३.१; ख०गृ०सू० ४.१.१५ तथा ऋते सत्यं)

ऋतं सपन्तो अमृतम् एवैः। ऋ०वे० १.६८.४[२]

ऋतं स पात्य् अरुषस्य वृष्णः। ऋ०वे० ५.१२.६[२]

ऋतं सपाम्य् अरुषस्य वृष्णः। ऋ०वे० ५.१२.२[४]

ऋतं सासाह महि चित् पृतन्यतः। ऋ०वे० ८.८६.५[३]

ऋतं सिन्धवो वरुणस्य यन्ति। ऋ०वे० २.२८.४[२]

ऋतं होता न इषितो यजाति। ऋ०वे० ७.३९.१[४]

ऋतं ह्य् अस्याम् आर्पितम्। अ.वे. १०.१०.३३[३]

ऋतजात ऋतावरि। अ०वे० ५.१५.१[३]-११[३]

ऋतजाता अरेपसः। ऋ०वे० ५.६१.१४[३]

ऋतजाता ऋतावृधः। अ०वे० १८.२.१५[२] (देखें-ऋतावान ऋतजाता तथा ऋतावान ऋतावृधः)

ऋतजिच् च सत्यजिच् च। वा०सं० १७.८३; तै०सं० ४.६.५.६; मै०सं० २.६.६, ६७.१५, २.११.१, १४०.२; का०सं० १८.६; मा०श्रौ० ६.२.५

ऋतज्येन क्षिप्रेण ब्रह्मणस् पतिः। ऋ०वे० २.२४.८[१]

ऋतं च मेऽमृतं च मे। वा०सं० १८.६; तै०सं० ४.७.३.२; मै०सं० २.११.३, १४१.१०; का०सं० १८.९

ऋतं च मे सत्यं चाभूताम्। तै० ब्रा० ३.७.७.४; आप०श्रौ० १०.९.४

ऋतं च यत्र श्रद्धा च। अ०वे० १०.७.११[३]

ऋतं च सत्यं च वदत। तै०सं० ३.२.७.१; आ०श्रौ० ५.२.१४; वै० सू० १७.४ (तुल०- इस तथा अगले, ऋतश् च के लिए)

ऋतं च सत्यं चाभीधात्। ऋ०वे० १०.१९०.१[१]; तै०आ० १०.१.१३[१]; महाना०उप०५.५[१]. प्रतीकः ऋतं च सत्यं च। शा०गृ० १.४.२; बौ०ध०सू० ४.४.२; महा०भा० १२.१५२.३० (देखें-अघमर्षण) (तुल०- नीचे पूर्व)

ऋतं च स्थ सत्यं च स्थ। आप०श्रौ० १६.३३.१

ऋतं चिकित्व ऋतम् इच् चिकिद्धि। ऋ०वे० ५.१२.२[१]

ऋतधामासि स्वर्ज्योतिः। (तै०सं० आप०श्रौ० सुवरो)। वा०सं० ५.३२; तै०सं० १.३.३.१; मै०सं० १.२.१२, २१.१५; का०सं० २.१३; पं०वि०ब्रा० १.४.९; शा०श्रौ० ६.१२.२३; आप०श्रौ० ११.१४.१०. प्रतीकः ऋतधाम। ला०श्रौ० २.२.२०

ऋतधीतय आ गत। ऋ०वे० ५.५१.२[१]

ऋतधीतयो रुरुचन्त दस्माः। ऋ०वे० ४.५५.२[४]

ऋतधीतयो वक्मराजसत्याः। ऋ०वे० ६.५१.१०[४]

ऋतधीतिभिर् ऋतयुग् युजानः। ऋ०वे० ६.३९.२[२]

ऋतं तपः। तै०आ० १०.८.१; महाना०उप०८.१

ऋतं त्वा सत्येन परिषिञ्चामि। (कौ०सू० जातवेदः जोड़ता है) तै०ब्रा २.१.११.१; शा०श्रौ० २.६.१०; आप०श्रौ० ६.५.४; कौ० सू० ३.४. प्रतीकः ऋतं त्वा। वै० सू० ७.४ (देखें-ऋतसत्याभ्यां)

ऋतं दिवे तद् अवोचं पृथिव्यै। ऋ०वे० १.१८५.१०[१]; आ०श्रौ० ३.८.१

ऋतं देवाय कृण्वते सवित्रे। ऋ०वे० २.३०.१[१] (तुल०- बृ. दा. ४.८४)

ऋतं नात्येति किं (गो०गृ० कश्) चन। तै० ब्रा० १.५.५.१[२]; आप०श्रौ० ८.४.२[२]; मा०श्रौ० १.७.२.२३[२]; गो०गृ० २.१.७[२] (तुल०- ऋते सत्यं)

ऋतपर्णक योऽवधीः। आप०श्रौ० २१.२०.३[२]. पढें- ऋतुपर्णकयोवधी (? देखें-र्ण्त्ह्,ँअश्उ ;न्ग ७४३)

ऋतपात्रम् असि। पं०वि०ब्रा० १.२.३; ला०श्रौ० १.९.२०

ऋतप्रजाता भग इद् वः स्याम। तै०सं० ३.१.८.२[२] (देखें-उत प्रजाता)

ऋतप्रजातां बृहतीम् अविन्दत्। ऋ०वे० १०.६७.१[२]; अ०वे० २०.९१.१[२]

ऋतम् अग्रे प्रथमं जज्ञे। आ०गृ०सू० १.५.४[१] (तुल०- ऋतम् एव)

ऋतम् अत्र नकिर् अस्मा अपीपेत्। ऋ०वे० १०.३१.११[४]

ऋतम् अर्षन्ति सिन्धवः। ऋ०वे० १.१०५.१२[३]

ऋतम् अवस्रन् उषसो विभातीः। ऋ०वे० ४.२.१९[२]; अ०वे० १८.३.२४[२]

ऋतम् अवादिषम्। तै०आ० ७.१२.१; तै०उप० १.१२.१; मा०श्रौ०सू० १.४.८

ऋतम् असि। तै०सं० १.१.९.३, ७.१.२०.१; का०सं० ३९.६; का०सं० अश्व० १.११; तै०ब्रा० ३.२.९.१२, ७.७.२; आप०श्रौ० २.३.७, १०.६.५, १६.३१.१

ऋतम् असि सत्यं नाम। तै०सं० ३.३.५.१.३

ऋतम् ऋतपाः सुवर्वाट् स्वाहा। तै०सं० ३.२.८.१

ऋतम् ऋतवादिभ्यः। वा०सं० ५.७; तै०सं० १.२.११.१; का०सं० २.८; मै०सं० १.२.७, १७.२; आ०ब्रा०१.२६.५; गो०ब्रा० २.२.४; श०ब्रा० ३.४.३.२१; आ०श्रौ० ४.५.७; शा०श्रौ० ५.८.५; वै०सू० १३.२४; ला०श्रौ० ५.६.९

ऋतम् ऋताय पवते सुमेधाः। ऋ०वे० ९.९७.२३[२]

ऋतम् ऋतेन सपन्ता। ऋ०वे० ५.६८.४[१]; सा०वे० २.८१६[१]

ऋतम् एव परमेष्ठि। (गो०गृ० प्रथमम्) तै०ब्रा० १.५.५.१[१]; आप०श्रौ० ८.४.२[१]; मा०श्रौ० १.७.२.२३[१]; गो०गृ० २.७.१[१] (तुल०- ऋतम् अग्रे)

ऋतम् एषां प्रशास्तासीत्। तै० ब्रा० ३.१२.९.४[३]

ऋतं पिपर्त्य् अनृतं नि तारीत्। (अ०वे० पाति)। ऋ०वे० १.१५२.३[४]; अ०वे० ९.१०.२३[४]

ऋतं प्रपद्ये। तै० ब्रा० ३.५.१.१; पा०गृ०सू० ३.४.६

ऋतं भरत् सुभृतं चार्व इन्दुः। ऋ०वे० ९.९७.२४[४]

ऋतं मन्वाना व्य् अदर्दिरुर् वलम्। ऋ०वे० १०.१३८.१[२]

ऋतये स्तेनहृदयम्। वा०सं० ३०.१३ (देखें-ऋत्यै' इत्यादि)

ऋतव एव प्र-वो-वाजाः। गो०ब्रा० १.५.२३[१] (तुल०- प्र वो वाजा)

ऋतवः परिवत्सराः। तै० ब्रा० १.५.५.६[४]; आप०श्रौ० ८.२१.१[४]; मा०श्रौ० १.७.८.८[२]

ऋतवश् च मे कल्पन्ताम्। तै०आ० ३.७.३ (तुल०- ऋतवस् ते क° तथा ऋतवो मे क°)

ऋतवस् त ऋतुथा पर्व। (तै०सं० । का०सं० अश्व० परुः)। वा०सं० २३.४०[१]; तै०सं० ५.२.१२.१[१]; का०सं० अश्व० १०.६[१]

ऋतवस् तम् अबध्नत। अ०वे० १०.६.१८[१]

ऋतवस् ते कल्पन्ताम्। वा०सं० २७.४५; का०सं० ४०.६; श०ब्रा० ८.१.४.८; तै०आ० ४.१९.१ (देखें-ऋतवो मे कल्पन्ताम् तथा तुलना ऋतवश् च)

ऋतवस् ते यज्ञं वितन्वन्तु। वा०सं० २६.१४[१]

ऋतवस् ते विहिता हायनीः। अ०वे० १२.१.३६[३]

ऋतवस् त्वा पचन्तु। तै०आ० ४.२६.१[१]

ऋतवस् त्वा संवत्सराय परिददतु। सा०मं०ब्रा० १.५.१५

ऋतव (का०सं० °वस्) स्थ ऋतावृधः। वा०सं० १७.३[१]; का०सं० १७.१०; श०ब्रा० ९.१.२.१८ (देखें-ऋतस्था स्थर्तावृधः)

ऋतवः स्थ संवत्सरे श्रिताः, मासानां प्रतिष्ठा, युष्मास्व इदम् अन्तः, विश्वं यक्षं विश्वं भूतं विश्वं सुभूतम्, विश्वस्य भर्तारो विश्वस्य जनयितारः। तै० ब्रा० ३.११.१.१५

ऋतवाकेन सत्येन। ऋ०वे० ९.११३.२[३]

ऋतवोऽङ्गानि। तै०सं० ५.७.२५.१; का०सं० अश्व० ५.५

ऋतवोऽधिपतय आसन। मै०सं० २.८.६, ११०.१०; का०सं० १७.५ (नीचे देखें- आ र्तवा अधिपतय)

ऋतवोऽभीशवः। अ०वे० ८.८.२२

ऋतवो मे कल्पन्ताम्। तै० ब्रा० ३.७.५.८; आप०श्रौ० ४.१०.९ (नीचे देखें- ऋतवस् ते कल्पन्ताम्)

ऋतवोऽसृज्यन्त। वा०सं० १४.२९; तै०सं० ४.३.१०.१; श०ब्रा० ८.४.३.८ (देखें-आ र्तवा असृज्यन्त)

ऋतश् च सत्यश् च। वा०सं० १७.८२; तै०सं० ४.६.५.६; मै०सं० २.६.६, ६७.१६, २.११.१, १४०.३; का०सं० १८.६; मा०श्रौ० ६.२.५ (तुल०- नीचे ऋतं च सत्यं)

ऋतश्रीर् असि। तै०सं० १.१.९.३; तै०ब्रा० ३.२.९.१२; आप०श्रौ० २.३.७

ऋतसत्याभ्यां त्वा पर्युक्षामि। आ०श्रौ० २.२.११; मा०श्रौ० १.६.१.१०. प्रतीक: ऋतसत्याभ्याम्. वृ०हा०सं० ५.२५३ (देखें-ऋतं त्वा)

ऋत सत्याय त्वा दक्षिणां नयानि। शा०श्रौ० २.७.१४

ऋतसदनम् असि। तै०सं० १.१.९.३; तै०ब्रा० ३.२.९.१२; आप०श्रौ० २.३.७ (तुल०- घर्मसद् असि)

ऋतसद् असि। तै०सं० ३.२.१०.१; मै०सं० १.१.१०, ६.७; का०सं० ३९.५; आप०श्रौ० १६.२९.२; मा०श्रौ० १.२.४.२१

ऋतसधस्थ। आप०श्रौ० २.३.१३

ऋतस्था स्थर्तावृध:। तै०सं० ४.४.११.४ (देखें-ऋतव स्थ ऋतावृध:)

ऋतस्य गर्भ: (मै०सं० धामन्; का०सं० धाम) प्रथमा व्यूषुषी। तै०सं० ४.३.११.५[१]; मै०सं० २.१३.१०[१], १६०.१२; का०सं० ३९.१०[१]; पा०गृ०सू० ३.३.५[१]

ऋतस्य गर्भं जनुषा (तै०ब्रा हविषा) पिपर्तन। ऋ०वे० १.१५६.३[२]; तै०ब्रा० २.४.३.९[२]

ऋतस्य गर्भो निहितो यमा पर:। ऋ०वे० ९.६८.५[२]

ऋतस्य गोपा अधि इत्यादि। (देखें- ऋतस्य गोपाव्)

ऋतस्य गोपा न दभाय सुक्रतु:। ऋ०वे० ९.७३.८[१]

ऋतस्य गोपाव् (मै०सं० गोपा) अधि तिष्ठतो रथम्। ऋ०वे० ५.६३.१[१]; मै०सं० ४.१४.१२[१], २३४.५

ऋतस्य गोप्त्री तपस: परस्वी। आ०मं०पा० परस्पी; मा०श्रौ०सू० तरुत्री)। सा०मं०ब्रा० १.६.२८[१]; आ०मं०पा० २.२.१०[१] (आप०गृ० ४.१०.११); मा०श्रौ०सू० १.२२.७[१]. प्रतीक: ऋतस्य गोप्त्री। गो०गृ० २.१०.३७

ऋतस्य जिह्वा पवते मधु प्रियम्। ऋ०वे० ९.७५.२[१]; सा०वे० २.५१[१]

ऋतस्य ज्योतिषस् पतिम्। अ.वे. ६.३६.१[२]; सा०वे० २.१०५८[२]; वा०सं० २६.६[२]; तै०सं० १.५.११.१[२]; मै०सं० ४.११.१[२], १६०.११; का०सं० ४.१६[२]; आ०श्रौ० ८.१०.३[२]; शा०श्रौ० ३.३.५[२]

ऋतस्य ज्योतिषस् पती। ऋ०वे० १.२३.५[२]; सा०वे० २.१४४[२]

ऋतस्य तन्तुं विततं विवृत्य। (वा०सं० विचृत्य; अ०वे० दृशे कम्)। अ०वे० २.१.५[२]; वा०सं० ३२.१२[३]; तै०आ० १०.१.४[३]; महाना०उप०२.६[३]

ऋतस्य तन्तुं मनसा मिम्मान:। अ०वे० १३.३.१९[३]

ऋतस्य तन्तुर् वितत: पवित्र आ। ऋ०वे० ९.७३.९[१]. प्रतीक: ऋतस्य तन्तुर् वितत:. वृ०हा०सं० ८.३५

ऋतस्य ते सदसीडे अन्त:। ऋ०वे० ३.५५.१२[३]

ऋतस्य त्वा ज्योतिषे। (मा०श्रौ० °षे गृह्णामि) तै०सं० ३.३.५.२, ५; मा०श्रौ० ७.२.६

ऋतस्य त्वा देव स्तोम पदे विष्णोर् धामनि विमुञ्चामि। पं०वि०ब्रा० १.६.५. प्रतीक: ऋतस्य त्वा। ला०श्रौ० २.११.१

ऋतस्य त्वा देवहवि: पाशेन प्रतिमुञ्चामि। (का०सं० प्रतिमुञ्चाम्य् अमुष्मै जुष्टम्; तै०सं० आप०श्रौ० पाशेनारभे)। वा०सं० ६.८; तै०सं० १.३.८.१; मै०सं० १.२.१५, २४.११; का०सं० ३.५, २६.८; श०ब्रा० ३.७.४.१; आप०श्रौ० ७.१३.८. प्रतीक: ऋतस्य त्वा देवहवि: पाशेन. मा०श्रौ० १.८.३.५; ऋतस्य त्वा। का०श्रौ० ६.३.२७ (देखें-देवस्य त्वा सवितु: हस्ताभ्याम् ऋतस्य)

ऋतस्य त्वा मात्रायै गृह्णामि। मा०श्रौ० ७.२.६

ऋतस्य त्वा विधर्मणे। (मा०श्रौ० °णे गृह्णामि) तै०सं० ३.३.५.२, ४; मा०श्रौ० ७.२.६

ऋतस्य त्वा विभूमने। तै०सं० ३.३.५.१, ४

ऋतस्य त्वा व्योमने (मा०श्रौ० °व्योम्ने गृह्णामि) तै०सं० ३.३.५.१, ४; मा०श्रौ० ७.२.६

ऋतस्य त्वा सत्याय। (मा०श्रौ० °य गृह्णामि) तै०सं० ३.३.५.२, ४; मा०श्रौ० ७.२.६

ऋतस्य त्वा सदसि क्षेमयन्तम्। ऋ०वे० ३.७.२[३]

ऋतस्य त्वा एनम् आमुत:। मै०सं० ४.१४.१७[४], २४४.५ (देखें-ऋतस्यर्तेन माम्)

ऋतस्य दृढा धरुणानि सन्ति। ऋ०वे० ४.२३.९[१]

ऋतस्य देवा अनु व्रता गु:। ऋ०वे० १.६५.३[१]

ऋतस्य देवी: सदसो बुधाना:। ऋ०वे० ४.५१.८[३]

ऋतस्य द्वारौ (पं०वि०ब्रा० ला०श्रौ० सू० द्वारौ स्थ:) मा मा संताप्तम्। वा०सं० ५.३३; पं०वि०ब्रा० १.५.१; शा०श्रौ० ६.१२.१३; ला०श्रौ० २.३.९. प्रतीक: ऋतस्य द्वारौ स्थ:। ला०श्रौ० २.४.१; ऋतस्य द्वारौ। का०श्रौ० ९.८.२०

ऋतस्य धर्मनु अमृतस्य सारुण:। ऋ०वे० ९.११०.४[२]; सा०वे० २.८५८[२]

ऋतस्य धामन् (तथा धाम) प्रथामा इत्यादि। (देखें- ऋतस्य गर्भ: इत्यादि)

ऋतस्य धामन् रणयन्त देवाः। ऋ०वे० ४.७.७[२]

ऋतस्य धाम वि मिमे पुरूणि। ऋ०वे० १०.१२४.३[२]

ऋतस्य धाम्नो अमृतस्य योनेह्। तै०सं० ४.२.७.२[२] (देखें–ऋतस्य योनिं महिषस्य तथा घृतस्य धारां महिषस्य)

ऋतस्य धारा अनु तृन्धि पूर्वीः। ऋ०वे० ५.१२.२[२]

ऋतस्य धाराः सुदुघा दुहानाह्। ऋ०वे० ७.४३.४[२]

ऋतस्य धीतिभिर् दमे। ऋ०वे० ९.१११.२[३]; सा०वे० २.९४२[३]

ऋतस्य धीतिम् ऋषिषाड् अवीवशत्। ऋ०वे० ९.७६.४[२]

ऋतस्य धीतिं ब्रह्मणो मनीषाम्। ऋ०वे० ९.९७.३४[२]; सा०वे० १.५२५[२], २.२०९[२]; नि० १४.१४[२]

ऋतस्य धीतिर् वृजिनानि हन्ति। ऋ०वे० ४.२३.८[२]; नि० १०.४१[२]

ऋतस्य धेना अनयन्त सस्रुतः। ऋ०वे० १.१४१.१[४]

ऋतस्य नः पतयो मृडयन्तु। ऋ०वे० ४.५७.२[४]; तै०सं० १.१.१४.३[४]; का०सं० ४.१५[४], ३०.४[४]; मा०श्रौ० ७.२.६[४]; आ०मं०पा० २.१८.४८[४]; नि० १०.१६[४]

ऋतस्य नः पथा नय। ऋ०वे० १०.१३३.६[३]

ऋतस्य नाभाव् अधि। (अ०वे० अभि) सं पुनामि। (अ०वे० पुनाति)। ऋ०वे० १०.१३.३[४]; अ०वे० १८.३.४०[४]

ऋतस्य नाभिर् अमृतं वि जायते। ऋ०वे० ९.७४.४[२]

ऋतस्य नावम् आ रुहद् रजिष्ठाम्। ऋ०वे० ९.८९.२[२]

ऋतस्य पत्नीम् अवसे हुवेम। (अ०वे० हवामहे)। अ०वे० ७.६.२[२]; वा०सं० २१.५[२]; तै०सं० १.५.११.५[२]; का०सं० ३०.४[२], ५[२]; मै०सं० ४.१०.१[२], १४४.१०; आ०श्रौ० २.१.२९[२]; शा०श्रौ० २.२.१४[२]

ऋतस्य पथा नमसा मियेधः। ऋ०वे० १०.७०.२[३]

ऋतस्य पथा नमसा विवासेत्। ऋ०वे० १०.३१.२[२]

ऋतस्य पथा नमसा हविष्मता। ऋ०वे० १.१२८.२[२]

ऋतस्य पथा पर्येहि। आप०श्रौ० ३.१९.६; मा०श्रौ० ५.२.१५.१५

ऋतस्य पथा प्रेत चन्द्रदक्षिणाः। वा०सं० ७.४५; वा०सं०काण्व० ९.२.६; तै०सं० १.४.४३.२, ६.६.१.३; मै०सं० १.३.३७, ४३.१६; का०सं० ४.९, २८.४; श०ब्रा० ४.३.४.१६. प्रतीकः ऋतस्य पथा प्रेत। मै०सं० ४.८.२, १०८.१६; मा०श्रौ० २.४.५.१३

ऋतस्य पथा सरमा विदद् गाः। ऋ०वे० ५.४५.८[४]

ऋतस्य पथि वेधा अपायि। ऋ०वे० ६.४४.८[१]

ऋतस्य पथ्या अनु। (वा०सं०काण्व० उप)। ऋ०वे० ३.१२.७[३]; सा०वे० २.९२७[३], १०४४[३]; वा०सं० ६.१२; वा०सं०काण्व० ६.३.१

ऋतस्य पदं कवयो नि पान्ति। ऋ०वे० १०.५.२[३] (तुल०– अगला एक)

ऋतस्य पदे अधि दीद्यानम्। ऋ०वे० ४.५.९[३]

ऋतस्य पदे कवयो नि पान्ति। ऋ०वे० १०.१७७.२[४]; तै०आ० ३.११.४[४], ५[४], ११[४]; जै० उ० ब्रा० ३.३६.१[४]। (तुल०– अगला एक)

ऋतस्य पन्था असि देवानां छायामृतस्य नाम। तै०सं० ७.१.२०.१; का०सं० अश्व० १.११

ऋतस्य पन्थां न तरन्ति दुष्कृतः। ऋ०वे० ९.७३.६[४]

ऋतस्य पन्थाम् अनु तिस्र आ गुः। अ०वे० ८.९.१३[१]; तै०सं० ४.३.११.१[१]; मै०सं० २.१३.१०[१], १६०.५; का०सं० ३९.१०[१]; आ०मं०पा० २.२०.३२[१] (आप०गृ० ८.२२.५)

ऋतस्य पन्थाम् अनु पश्य साधु। अ०वे० १८.४.३[१]

ऋतस्य पन्थाम् अन्वेतवा उ। ऋ०वे० ७.४४.५[२]

ऋतस्य पन्थाम् अन्व् एति साधु। ऋ०वे० १.१२४.३[३], ५.८०.४[३]

ऋतस्य पन्थाम् अन्व् एति होता। (देखें– अगला एक)

ऋतस्य पन्थाम् अन्व् एमि साधुया। ऋ०वे० १०.६६.१३[२]

ऋतस्य पन्थाम् अन्व् एमि। (आप०श्रौ० एति) होता। आ०श्रौ० १.३.२५; आप०श्रौ० २४.१२.७[४]

ऋतस्य पन्थाम् अन्व् एषि विद्वान्। अ०वे० १७.१.१६६[४]

ऋतस्य पस्त्यसदो अदब्धान्। ऋ०वे० ६.५१.९[२]

ऋतस्य प्रथमा द्वाः। अ०वे० ९.३.२२[४]

ऋतस्य प्रेषा ऋतस्य धीतिः। ऋ०वे० १.६८.५[१]

ऋतस्य बुध्न उषसाम् इषङ्यन्। ऋ०वे० ३.६१.७[१]

ऋतस्य बोध्य् ऋतचित् स्वाधीः। ऋ०वे० ४.३.४[२]

ऋतस्य ब्रह्म प्रथमोत जज्ञे। तै० ब्रा० २.४.७.१०[३] (देखें–भूतानां ब्रह्मा)

ऋतस्य भागे यजमानम् आ भजत्। ऋ०वे० १.१५६.५[४]

ऋतस्य मन्ये मनसा जविष्ठा। ऋ०वे० ४.२.३[२]

ऋतस्य मा प्रदिशो वर्धयन्ति। ऋ०वे० ८.१००.४[३]

ऋतस्य मित्रावरुणा पथा वाम्। ऋ०वे० ७.६५.३[३]

ऋतस्य या अभ्रिक्षन्ति गोपाः। ऋ०वे० १.१६३.५[४]; वा०सं० २९.१६[४]; तै०सं० ४.६.७.२[४]; का०सं० ४०.६[४]

ऋतस्य याति पथिभिः कनिक्रदत्। ऋ०वे० ९.८६.३३[२]

ऋतस्य याः सदने कोशे अङ्ग्ध्वे। ऋ०वे० १०.१००.१०[२]

ऋतस्य योगे वनुषः। ऋ०वे० ३.२७.११[२]

ऋतस्य योगे वि ष्यध्वम् ऊधः। ऋ०वे० १०.३०.११[३]; नि० ६.२२[३]

ऋतस्य योनयोऽमृतस्य धाम। ऋ०वे०खि० ९.६७.१५[१]

ऋतस्य योना इह इत्यादि। (देखें- 'ऋतस्य योनाव्' इत्यादि)

ऋतस्य योना क्षयतः समोकसा। ऋ०वे० १०.६५.८[२]

ऋतस्य योना गर्भे सुजातम्। ऋ०वे० १.६५.४[२]

ऋतस्य योना महिषा अहेषत। ऋ०वे० ९.८६.२५[४] (तुल०- ऋतस्य योनौ महिषा)

ऋतस्य योनाव् अशयद् दमूनाः। ऋ०वे० ३.१.११[३]

ऋतस्य योना विघृत् मदन्ती। ऋ०वे० ३.५४.६[२]

ऋतस्य योनाव् (वा०सं०काण्व० मै०सं०। का०सं० अश्व० योना) इह सादयामि। वा०सं० २९.६[४]; वा०सं०काण्व० ३१.६[४]; तै०सं० ५.१.११.३[४]; मै०सं० ३.१६.२[४], १८४.९; का०सं० अश्व० ६.२[४]

ऋतस्य योना वृषभस्य नीडे। ऋ०वे० ४.१.१२[२]

